सं. ५०२६ त: ५०३४ पर्यन्तम्

क. त: देवी माहात्म्यं

अ. अलं. भवानी सहस्रनाम.

अष्ट पुस्तकानि

पत्र. २२ (सर्वेषां) —— सं.

विषया: भक्ति: पुराण माहात्म्यं

तन्त्रं.

प० २० पत्रम

त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता सा शिवा चंडिका दुर्गा भद्रा भगवतीनृप । योगनिद्रा हरेरुक्ता मह
हाकाली तमोगुणान् मधुकैटभनाशार्थं यां तुष्टावांबुजासनः २ दशवक्त्रा दशभुजा दशपादा
ञ्जनप्रभा विशालया राजमाना त्रिंशल्लोचनमालया स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमि
प रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियः ४ खड्गबाणगदाशूलशंखचक्रकपालभृत्
परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ५ एषा सा वैष्णवी माया महाकाली दुरत्यया आराधिता व
शीकुर्यात् पूजाकर्तुश्चराचरं ६ सर्वदेवशरीरेभ्यो याविर्भूतामितप्रभा त्रिगुणा सा महालक्ष्मीः सा
क्षान्महिषमर्दिनी ७ श्वेतानना नीलभुजा सुश्वेतस्तनमंडला रक्तमध्या रक्तपादा नीलजंघो
रुरुन्मदा ८ सुचित्रजघना चित्रमाल्यांबरविभूषणा चित्रानुलेपना कान्तिरूपसौभाग्यशा
लिनी ९ अष्टादशभुजा पूज्या सा सहस्रभुजा सती आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकरक्र
मात् १० अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा चक्रं त्रिशूलं परशुः शंखो घंटा च पाश
कः ११ शक्तिर्दंडश्चर्म चापं पानपात्रं कमंडलु अलंकृतभुजामेभिरायुधैः कमलासनां १२
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप पूजयेत्सर्वलोकानां स देवानां प्रभुर्भवेत् १३ गौरी
देहात्समुद्भूता या सत्त्वैकगुणाश्रया साक्षात्सरस्वती प्रोक्ता शुंभासुरनिबर्हिणी १४ दधौ चाष्टभु
जा बाणमुसले शूलचक्रभृत् शंखं घंटां लांगलं च कार्मुकं वसुधाधिप एषा संपूजिता भक्त्या
सर्वज्ञत्वं प्रयच्छति निशुंभमथनी देवी शुंभासुरनिबर्हिणी १६ इत्युक्तानि स्वरूपाणि मूर्तीनां त
व पार्थिव उपासनं जगन्मातुः पृथगासां निशामय १७ महालक्ष्मीर्यदा पूज्या महाकाली सरस्व
ती दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् विरिंचिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे वामे ल

श

दु· कृष्णा हृषीकेशः पुरतो देवतात्रयं १९ अष्टादशभुजा मध्ये वामे चास्या दशानना दक्षिणेऽष्टभुजा लक्ष्मीर्मह
दी ११ ती यथाक्रमं २० सर्वादिदलतः पूज्या स्थिता गणद्वष्टभैरवाः अष्टादशभुजा चैषा यदा पूज्या नराधिप २१
दशानना चाष्टभुजा दक्षिणोत्तरयोस्तथा दशानना यदा पूज्या दक्षिणोत्तरयोस्तथा २२ कालमृत्यू
च संपूज्यौ सर्वारिष्टप्रशान्तये यदा चाष्टभुजा पूज्या शुम्भासुरनिबर्हिणी २३ दशानना चाष्टभु
जा शुंभासुरनिबर्हिणी नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ २४ नमो देव्या इति स्तोत्रैर्महा
लक्ष्मीं समर्चयेत् अवतारत्रयार्चायां स्तोत्रमन्त्रास्तदाश्रयाः २५ अष्टादशभुजा चैषा पूज्या महिष
मर्दिनी महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती २६ ईश्वरी पुण्यपापानां सर्वलोकमहेश्व
री महिषान्तकरी येन पूजिता स जगत्प्रभुः २७ पूजयेज्जगतां धात्रीं चण्डिकां भक्तवत्सलां अर्घ्या
दिभिरलंकारैर्गन्धपुष्पैस्तथाक्षतैः २८ धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्यैः समन्वितैः रुधिराक्तेन
बलिना मांसेन सुरया नृप २९ प्रणामाचमनीयेन चन्दनेन सुगन्धिना सकर्पूरैश्च ताम्बूलैर्भक्ति
भावसमन्वितैः २९ वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरं पूजयेन्महिषं येन प्राप्तं सायु
ज्यमीशया ३० दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरं वाहनं पूजयेद्देव्या धृतं येन चराच
रं ३१ ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैरिमैः ऊष्मा नास्तवनं धीमान्नस्यामेकाग्रमानसः ३२
एकेन वा मध्यमेन नैकेनेतरयोरिह चरितार्धं न च जपेज्जपंश्छिद्रमवाप्नुयात् ३३ स्तोत्रमन्त्रैः
स्तुवीतेमां यदि वा जगदम्बिका प्रदक्षिणनमस्कारं कृत्वा मूर्ध्नि कृताञ्जलिः ३४ क्षमापयेज्ज
गद्धात्रीं मुहुर्मुहुरतन्द्रितः प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा जुहुयात्स्तोत्र
मन्त्रैर्वा चण्डिकायै शुभं हविः भूयो नामपदैर्देवीं पूजयित्वा समाहितः ३५ प्रयतः प्रा
ञ्जलिः प्रह्वः प्रणम्यारोप्य चात्मनि सुचिरं भावयेद्देवीं चण्डिकां तन्मयो भवेत् ३६

एवं यः पूजयेद्भक्त्या सततं परमेश्वरीम् भुक्त्वा भोगान्यथाकामान्देवीसायुज्यमाप्नुयात् ३८ यो न
पूजयते नित्यं चंडिकां भक्तवत्सलां भस्मीकृत्यास्य पुण्यानि निर्दहेत्परमेश्वरी ३९ तस्मात्पू
जय भूपाल सर्वलोकमहेश्वरीं यथोक्तेन विधानेन चंडिकां सुखमाप्स्यसि ४० इति श्रीमा
र्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये प्राकृतिकं रहस्यं नाम द्वितीयं २ ऋषिरुवाच
नंदा भगवती नाम यया भविष्यति नंदजा सा स्तुता पूजिता ध्याता वशीकुर्याज्जगत्त्रयं १ कनको
त्तमकांतिः सा सुकांतिकनकांबरा देवी कनकवर्णाभा कनकोत्तमभूषणा २ कमलांकु
शपाशाब्जैरलंकृतचतुर्भुजा इंदिरा कमला लक्ष्मीः सा श्री रुक्मांबुजासना ३ या रक्त
दंतिका नाम देवी प्रोक्ता मयानघ तस्याः स्वरूपं वक्ष्यामि शृणु सर्वभयापहं यक्त्वा
सर्वपापेभ्यो मुच्यते नात्र संशयः रक्तांबरा रक्तवर्णा रक्तसर्वांगभूषणा ५ रक्तायुधा र
क्तनेत्रा रक्तकेशातिभीषणा रक्ततीक्ष्णनखा रक्तदशना रक्तदंतिका ६ पतिं नारी
वानुरक्ता देवी भक्तं भजेज्जनं वसुधेव विशाला सा सुमेरुयुगलस्तनी ७ दीर्घौ लं
बावतिस्थूलौ तावतीव मनोरमौ कर्कशावतिकांतौ तौ सर्वानंदपयोनिधी ८
भक्तान्संपाययेद्देवी सर्वकामदुघौ स्तनौ खड्गं पात्रं च मुसलं लांगूलं च बिभर्ति सा ९
आख्याता रक्तचामुंडा देवी योगेश्वरीति च अनया व्याप्तमखिलं जगत्स्थावर
जंगमं १० इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरं भुक्त्वा भोगान्यथाकामं
देवीसायुज्यमाप्नुयात् ११ ... शाकंभरी नीलव

दु॰ १२

तीनीलोत्पलविलोचना १२ गंभीरनाभिस्त्रिवलीविभूषिततनूदरी सुकर्कशसमोत्तुंगवृत्तपीनघ
नस्तनी १३ षट्भुजालीमुखा शंगी कमलं कमलालया पुष्पपल्लवमूलादिफलाढ्यं शाकसंचय १४
काम्यानन्तरसैर्युक्तं क्षुत्तृण्मृत्युजरापह कार्मुकं च स्फुरत्कान्ति बिभ्रती परमेश्वरी १५ शाकंभ
रीशताक्षीसासैवदुर्गाप्रकीर्तिता उमागौरीसतीचंडीकालिकासाचपार्वती १६ विशोकादु
ष्टदमनीशमनीदुरितापदः शाकंभरीस्तुवंध्यायंजपन्पूजयन्नमन् १७ अक्षयानश्नुते शी
घ्रमन्नपानरसान्बहून् भीमापिनीलवर्णासा दंष्ट्रादशनभासुरा विशाललोचनानारी
पीनोन्नतपयोधरान् चंडहासं चडमरुं शिरःपात्रं च बिभ्रती १८ एकवीराकालरात्रिः सैवो
क्ताकामदास्तुता तेजोमंडलदुर्दर्षा भ्रामरी चित्रकान्तिभृत् २० चित्रानुलेपनादेवी चित्रा
भरणभूषिता चित्रभ्रमरपाणिः सा महामारीति गीयते २१ मेधाप्रज्ञा तथा श्रद्धाधारणा
कान्तिरेव च भवंति लक्षणो नित्यं चंडिकामानवस्य च २२ इति ते मूर्तयो देव्या व्याख्याता व
सुधाधिप जगन्मातुश्चंडिकायाः कीर्तिताः कामधेनवः २३ इदं रहस्यं परमं न वाच्यं कस्य
चित्वया व्याख्यानं दिव्यमूर्तीनामभीष्टफलदायकं २४ देवीनां यत्नतः सर्वंग्राह्यं हृत्स्थं तर
सुतं श्रद्धेदेव्याश्च माहात्म्यमाख्यातं तव पार्थिव २५ इति श्रीमार्कंडेयपुराणे सावर्णिके म
न्वंतरे देवीमाहात्म्ये रहस्यं समाप्तम् ॐ मार्कंडेयपुराणोक्ते देवीमाहात्म्यमुत्तमं यः पठेत्
शृणुयाद्वापि तस्य मुक्तिर्नसंशयः । अज्ञानाद्विस्मृतेर्भ्रान्त्या यन्न्यूनमधिकं कृतं विपरीतं तु तत्सर्वं
क्षमस्व परमेश्वरी २ यदक्षरपदभ्रष्टं स्वरव्यंजनवर्जितं तत्सर्वं क्षमितां देवि प्रसीद परमेश्वरि ३
यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु न्यूनं संपूर्णतां याति त्वत्प्रसादात्परमेश्वरि ४
मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि यत्स्तुता मिमया देवि तस्मात्त्वं वरदा भव ५ आपा

इत्येवं स्तोत्रं चावतन्मातृत्रयं जपंतया विसर्जनं न जानामि चंडिके त्वं क्षमस्व मे कामेश्वरी जगन्माता सच्चिदानंद
विग्रहा गृहाणार्चामिमां सर्वां प्रसीद करुणानिधे गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिः
भवतु मे देवि त्वत्प्रसादान्महेश्वरि १ प्रार्थनासमये स्तव्यः देवि त्रिपुरसुंदरि यथाशक्ति जपं पूजां
गृहाण परमेश्वरि २ सप्तमश्वासः संपूर्णः ॥ ओंगजोवाच मुने कथय सर्वज्ञ भूयः किंचिदनुत्तमं
तत्त्वमेतस्य सर्वस्य येन सिद्धिरवाप्यते ऋषिरुवाच भूयः शृणु महाभाग देवीमाहात्म्यमुत्तमं विना
येन स्तवस्यास्य निर्जीवो नं पठेन १ दृष्ट्वा प्रभुभविनिर्जितं दारुणं देवकंटकं आजग्मुः परमानंदत
स्त्रिविष्टपमहेश्वराः ३ देवीस्तुतिं समाधाय गगने तालसंयुताः आज्ञामादाय देवेशः शक्रस्तु दर्शनमादरात्
४ बद्धाञ्जलिः पुटः साक्षात्प्रहृष्टः क्रमशः शिवां लोकानां चोदितायाय देवी सत्कारमिनार्चितं ५
ब्रह्मा सरस्वती सार्धं लक्ष्मी सार्धं जनार्दनः सहितस्तथा महाकाल्या शंकरः स्तवमब्रवीत् ६ ब्रह्मो
वाच प्रजापुराणमसमा सनातनी चतुर्भुजा पुस्तकमक्षधारिणी वराभयाभ्यामनघेति मित्तमां
नमामि तां ज्ञानमयां वितारिणीं ७ सरस्वती त्वामनुनोमि वाचं वाचा प्रसादं सवराधिरूढां ।
मुक्तामणिद्योतितकंठचक्रां तां नाम्यैकलभ्यां परमां पवित्रां ८ श्रीकंठशक्तित्रयशेषमानां दक्षर
तूर्यं कृतानुरूपां पचारवासाभ्यत भ्रमतां गृहां रां सरस्वतीं त्वां प्रणमामि देवीं ९ कलाढ्यमंत्राम
धिकोटिनायं विहारयंत्रं विमर्शैकशोभां स्वच्छवदनां स्फटिकानुरूपां सरस्वतीं त्वां प्रणमा
मि मानः वाक्कायकार्यैः परमैः पवित्रैः रमा रमां गीर्वरदाभदत्तैः बीजैरमीभिः कपिबीजयुक्तैः
क्लीं युग्मतिग्मैरिति मंत्रराजा ११ एकेन चैकेन च युग्मके न द्वाभ्यां मध्ये केन तथैव चशेषैः
करांगन्यासैः परमो नमोयं निहंति पापानि च साधकानां १२ हठेन चैवं प्रबलया च सत्पादि

स्त. धातृपद्माचनयैषवाचांश्रीकेनवत्साकिलयोभयाचन्यासैरमीभिः पतितोपिप्रांशुः नह द्रवेणाहेतुमात्सक
२३ लार्थसिद्धिः स्तुकिंस्तुकैर्वागणिसिद्धिमृच्छेत् महायस्तूर्पोणरमानिवासाः स्वपास्तसेनापिचवेद
सिद्धिः १४ नचावजेमहिमानंवयीमिस्तस्तुतिप्रथितेलोकमध्ये जानंतिकिंबुद्बुदाभ्रमितोयेनरा
वयंब्रह्महरीशमुख्याः १५ नचैववाचावयंसंवदामोविश्राममालामथैवाचजीवा पद्मपमहेत्वादि
मा त्वमहे शिरस्थपाणिसाक्षात्वविसंयुताये १६ स्वांदविदामस्तवशक्तियोगाद्दस्तीमहितत्वश्च
नयामहेशा गक्कामहेत वपाकेप्रभा वाद्यानंदयुक्तात्तवसंनिवेशनात् १७ आत्मा मनत्वं
त्वमेवासिदेहस्त्वमेववैवेन्द्रियपंचतन्मा त्वमेववैविषयः सहमुख्याः परावरेषांपरतत्वमेव १८
रविश्चतेचंद्रमाश्चतेताराश्चतेभूश्चतेनलंचतेतेजश्चतेवायुश्चतेप्राणश्चतेपानश्चतेव्यानश्चतेउदान
श्चतेसमानश्चतेनागश्चतेकूर्मश्चतेकृकलश्चतेदेवदत्तश्चतेधनंजयश्चतेभूतात्माचतेज्ञानात्मा
चतेसर्वात्माचतेममचित्तत्वय्येवविनिचिरएतां १९ यदानचाउभुवनानिजीवानाहंनविसुद्ध
विपर्यतेप्राः नचप्रभुरोनापिसदाशिवश्च त्वमेवचासीदितिचाभविष्या २० कालस्त्वमेवासि
जगत्त्रयाणांस्वभाववीर्यादिकचत्वमेव त्वमेवविश्वंपरमात्मशक्तिंनमामितेपादपीठंसरस्व
ति २१ त्वंवेदवाणीनिखिलश्च वेदस्त्वप्राकृप्राक्तिश्चनपापघशक्तिः त्वंब्रह्मविद्यापिपरावरं
त्विंत्वंब्रह्मशक्तिंशरणंप्रपद्ये स्तुक्तंवेदस्तभंगसरस्वतिप्रातश्चमध्याह्नकालेचसायं पठंति
येश्रद्धयासर[illegible]तास्तेभोगोकमोक्षसुखंसालभंते २३ नतेंकुर्योनिंदरिद्रतांचाध्यात्मा
दिताःपनवसंलभंते तएवधन्याश्चतएवपूज्याःसर्वेत्रमान्याभवतीहतेषां २४ पदंपुराणांवि
रंजसुधामयंतत्वभूतंजगतांत्रयाणां तेषामहंनिपकदप्रभवत्वारं लांसर्वयोनिंशरणंप्रपद्ये २५

ऋषिरुवाच स्तुतानया वेदवान्या सर्वसारस्वत्रूपया प्रसन्ना देवदेवीशे महासर्वा सरस्वती २६
आविर्भूता महादेवी ब्रह्मतोषैककारिणी उवाचच चनेद्दिव्यब्रह्मानंदप्रदायकं २७ श्रीदेव्यु
वाच स्तवेनानया वत्स ब्रह्मस्तु प्रसन्नोषसमन्विता स्तुतास्मि प्रियतादेव वरं संतोषकारक २८
ब्रह्मोवाच तदद्य येमनो देवी दृढं भवतु सर्वदा एषएव वरः साक्षादुत्तमो प्रार्थ्यते मया ३० स्व
स्तके चापि देवि श्रीनेत्रो दिव्यं विधीयतां येन कोट्यादि सिद्ध्यति साधकानां महात्मितां
३१ श्रीदेव्युवाच सर्वदा ते मनो देवी कुलधर्मे स्थसुभजिते दृढं भवतु सस्कं च प्रसादान्मे परं
तपः ३२ सर्वसिद्धिप्रदं चास्तु परमानंददायकं विनाह्यकं पठेद्यस्तु स्तोत्रं समप्रातीतिच
३३ मा त्वं गमी सविज्ञे यो नरकावासतत्परः ममैवाज्ञा परार्द्धे नब्रह्मन्ब्रह्मागतिं व्रजेत् ३४
ऋषिरुवाच एवमुक्त्वा वचो देवी तूष्णीमासीन्नृपोत्तम इति सरस्वतीस्तवं ब्रह्मांजलिसमाधा
यकृतिः प्रोवाच विघ्नकृत्त रुद्ररुवाच परावरां जगदादिभूतां महालक्ष्मी धारिणीधारण
ब्रह्मादिमादिं परमां स्वरूपां त्वां विश्वयोनिं शरणं प्रपद्ये ३५ एकामनेकां विविधां सुकार्यां
कारिणीं सदसद्रूपिणीं च रूपामरूपां च शिवां शिवप्रदां त्वां विश्वयोनिं शरणं प्रपद्ये ३६
सर्वाश्रयां सर्वजगन्निवासां श्रीमन्महाकालहृदि मनादिदेवां प्राक्तिस्वरूपां च शिवस्वरूपां
त्वां विश्वयोनिं शरणं प्रपद्ये ३७ त्रिमात्रिकामात्रीमधिकं सम्भूतां ह्रींरूपिणीं कपिबीजप्रभा
वां कर्णाष्टबीजां परमार्थसंज्ञां त्वां विश्वयोनिं शरणं प्रपद्ये ३८ वैश्वानरस्त्री सहितेन दे
वीश्रीमंत्रराजेन विराजमानां सर्वाधिधात्री परमां यविज्ञां त्वां विश्वयोनिं शरणं प्रपद्ये ३९ त्रि
कोणपंचास्यगप्रभावां षट्कोणतिस्रादिदशारयुक्तां अष्टारचक्रादिनिवासभूतां त्वां
विश्वयोनिं शरणं प्रपद्ये कोणांकितभूगृहांच

सू॰
१४

मंत्राधिवासामपियं त्वद्रूपां तां विश्वयोनिं प्रपद्ये ४१ संभाविता सर्ववन्द्याः सत्यरूपा सर्वस्वरूपा
मपि सर्वसेव्या सर्वान्तरन्यासवक्षःस्थले च स्थितां तां विश्वयोनिं प्रणतोस्म्यहं ४२ सृष्टिस्थितिप्रलय
स्वेच्छया वीजैर्न्यासं विधाय प्रजपन्ति ये त्वां त एव राजेन्द्रनिर्दिष्टपादा विद्यादरे सर्वशोभालभंते
४३ प्रसूनपत्रैर्विधिना महेशि सम्पूज्य सम्पन्नापरमसुभाग्याः जपन्ति ये त्वां विविधार्थदात्री
त एव धन्याः कुलमार्गनिष्ठाः ४४ जानन्ति केचित्पापवस्तु कुरूपा ब्रह्मादि गीते महिमा महेशि
केचिन्महान्तो निजधर्मलाभा ज्ञानन्ति ते देवपरं सुधाम ४५ विधाय कुण्डं विधिना स्थले वा सो
गधिर्होमं सफलं प्रकुर्वते त्वन्नोषणं ज्ञायते भाग्यमात्रं ये वासुदेवे रपि योगगम्य ४६ सु
नाः स्तुतिप्रपन्नो विश्वसारा स्तोत्रे कुदारैः कुलयोगयुक्ताः त एव धन्याः परमार्थभाजो भो
गम्यं माहात्म्यं करे स्थितेषां ४७ ऋषिरुवाच इति श्रीस्तुतपा देवी महालक्ष्मीं ददर्श सः
चतुर्भुजा विनयनाम हिषासुरघातिनी ४८ प्रसन्नश्रीमन्महालक्ष्मीप्रसन्नात्स्मितगौरवान् उवाच
स्मितशोभाढ्या नारायणमजं प्रभुं ४९ श्रीदेव्युवाच वरं वरय देवेशि नारायणसनातन दा
स्वामयाभिदान्तव्यत वस्तुत्यावशीकृता ५० नारायणउवाच माता परमकारुण्ये महालः
ह्नि वरम्यदे कुलाचारे मति र्मेस्तु दृढ नेस्तु तथा शिवे ५१ तवस्तुतं च सफलं तव सुप्रीतिकार
तां श्रीदेव्युवाच वरमेतन्महाभाग नारायणसनातन ५२ सूक्तमेतद्धि तायस्तु पठेत्सप्रश
तीनराः तयानि च मकावोरे नरकं दारुणं किल ५३ लिप्यन्ते परमं शापं मम कोपविवृद्धितः
लक्ष्मीसूक्तं विना सप्तशती स्तोत्रं निषिध्यते ५४ ऋषिरुवाच एवमुक्त्वा वचो देवी तूष्णीं भा
वगता नृप इति महालक्ष्मीसूक्तं ततो जलिं सम्पाधाय शिवो वाच मुदायुतः ५५ नु
ष्टाव वाग्भिर्दिव्याभिर्महाकालीं महेश्वरः वेदवाणीसुतत्वाभिर्लोकानाकृतकामधा

वै

५६ शिव उवाच शिवां ममनिशां विविधप्रभावां कालीं कलामालिनीं विश्ववंद्यां कपालखे-
ट्वांगधरां नृमुंडमालाविभूषां मृगचर्मशोभां ५७ सुशुष्कमांसां च शिवासनस्थां विभीषणां
भीषयंतीं सुवीरान् रक्तप्रियां मां समदां विघूर्णां कालीं शरण्यां शरणं व्रजामि ५८ सुघोर
बीजं च कपीठमध्ये चिंतामणिः कुब्जिक कौमहत्य विद्या च विद्याधुनकामराजं कामः क-
लाकामिनी कामराजं ५९ वक्रेव धर्मं व रजोय मोघो विश्वं पुनातीश्वरदेवि वद्रे मंत्रेण चा-
नेन सिध्यंति वा सुतस्तु सिद्धयः सर्वजगन्निवासे ६० पंचास्युग्मं च त्रिकोणयुग्मं तु नखाग्रचा-
ग्रयुग्मे नवहृत्कलाप्रकोष्ठकीलभ्रगुरुं च यंत्रेश्वरे ते चपदाब्जवासं ६१ संपूज्य यंत्रं तव विश्व-
नायके निःपापिनः संहसा सभवंति ये साधकास्तव मार्गानुसारिणः कुलाद्युदृष्ट्याः परमाप-
वित्राः ६२ ते सिद्धिमृद्धिं च यशो नु गम्यां नृणां वशीकृत्य गृणां नमूपा समस्तमंत्रं विधाय चा-
गत्यासादि वभक्तिस्वभावयुक्ताः ६३ ते किं करीकृत्य गणांति देवा [illegible] शेषे जगन्मेय व विभूति-
युक्ते वदामि नान्यं न स्तुणोनि चान्यं न्नमामि नानानविचिंतयामि स्मरामि नान्यं न भजामि नि-
चान्यध्यायामि नान्यं न वितर्कयामि गायामि नान्यं तव पाद मंत्रात्वादिश्वयोनिशरणप्र-
ने पद्ये ६४ ये षा न दैवं तु मितासि देवी नाराधयंती रुचये कुबुद्धयः अंधं नमपाठि [illegible] सदा ते
मादृशनंते डरात्मनो ६५ ऋषिरुवाच इति वाक्यसमाकर्ण्य परमामृतसंमितं प्रसन्नस्मुखमना
काली प्रियतामीप्सितो वरः देव्युवाच विशालाक्षीशंभो गानंददायिनी प्रसन्नापरमाह्ला-
दसंयुता शिवभाषणात् ६६ श्रीदेव्युवाच प्रियतां मनसोभीष्टो वरो जगति दुर्लभः द-
दाम्यभिदाभिदानन्य नवस्तुत्या वशीकृता ६७ श्रीशिव उवाच कुलाचारेण ते देवि म

स॰ ५१

निर्मितकदाचन शिथिलादेव देवेशि सूक्ते च सफलं नव २० श्रीदेव्युवाच एवमस्त्विति चोक्त्वाथ
निद्रादेव्याः सनातनाः अन्तर्हिता सुपरमा एकस्मिन्नास्थिता भवत् २१ अथ तां स्तुवतो देव्यास्तो
वाचवचनं मुसंतोषयन्ती च मुकुलीकान्तु ग्रहं तत्पर अण्डधंशीति संयुक्ता ब्रह्मविष्णुम
हेश्वराः देवीसूक्तं पठन्ध्याय भविष्यति वरार्थदं २३ देवीसूक्तं विना देवा ये च सप्तशतीं नरा
श्रोष्यंति च पठिष्यंति तेषां शापः पदे पदे २४ देवीसूक्तं विना पाठो स्नानं पैरोदनं यथा ।
स्तोत्रोद्धारेण वर्जेन सर्वाणि स्तोत्रम् भूदिदं देवा ऊचुः माता सप्तशती स्तोत्रफलस्तुतिमि
रोचितां यास्माकमेप जीवानां विश्वासो जायते भृशं २६ ऋषिरुवाच इति वाक्यं समा
कर्ण्य ब्रह्मविष्णुशिवोदितं फलस्तुतिमथावाच स्तोत्रस्यास्य समहामते २७ इति
श्रीरुद्रयामले तंत्रे देवीमाहात्म्ये सप्तशतिकायां देवीसूक्तवर्णनं नाम समाप्तः ॥
ॐ नमः त्रिपुरसुंदर्यै ॐ ऐंद्रस्येव शरासनस्य दधती मध्ये ललाटं प्रभां शौक्लीं कांतिमनु
ष्णगोरिव शिरः स्यातन्वती सर्वतः एषासौ त्रिपुरा हृदि द्युतिरिवोष्णांशोः सदाहःस्थिता
छिंद्यान्नः सहसा पदैस्त्रिभिरघं ज्योतिर्मयी वाङ्मयी १ यामात्रात्रपुसीलतातनुलसत्
तंतूत्थितिस्पर्धिनी वाग्बीजे प्रथमे स्थिता तव सदा तां मन्महे ते वयं शक्तिः कुंडलि
नीति विश्वजननव्यापारबद्धोद्यमां ज्ञात्वेत्थं न पुनः स्पृशंति जननीगर्भेर्भकत्वं नराः २
दृष्ट्वा संभ्रमकारि वस्तु सहसा ऐ ऐ इति व्याहृतं येनाकूतवशादपीह वरदे बिंदुं विना
प्यक्षरं तस्यापि ध्रुवमेव देवि तरसा जाते तवानुग्रहे वाचः सूक्तिसुधारसद्रववमुचो
निर्यांति वक्त्रादरात् ३ यन्नित्ये तव कामराजमपरं मंत्राक्षरं निष्कलं तत्सारस्वत

भियवैवेति विरलः कश्चिद्बुधश्रेष्ठ इति ध्यात्वानुप्रतिपर्वसत्पत्तपसोयत्कीर्त्यते द्विजाः प्रारंभेपुरणा
वासरद्वयणाय्यिनीनितेप्राप्नुवंति स्फुटं ४ यत्सद्यो वचसां प्रवृत्तिकरणे दृष्टप्रभावं बुधैस्तार्तीयं तद
हं नमामि मनसा त्वद्बीजमिंदुप्रभं अस्त्वौर्वोपि सरस्वतीमनुगतो जाड्यांबुविच्छित्तये गोशब्दो
गिरि वर्तते सुनियतं योगं विना सिद्धिदः ५ एकैकं तव देवि बीजमनघं सव्यंजनाव्यंजनं कूट
स्थं यदि वा पृथक्क्रमगतं यद्वा स्थितं व्युत्क्रमात् यं यं कामम पेक्ष्य येन विधिना केनापि वा चिं
तितं जप्तं वा सफलीकरोति तरसा तं तं समस्तं नृणाम् ६ वामे पुस्तकधारिणीमभयदां साक्ष
स्रजं दक्षिणे भक्तेभ्यो वरदानपेशलकरां कर्पूरकुंदोज्ज्वलां उज्जृंभांबुजपत्रकांतिन
यनस्निग्धप्रभालोकिनीं ये त्वामंब न शीलयंति मनसा तेषां कवित्वं कुतः ७ ये त्वां पांडुर
पुंडरीकपटलस्पष्टाभिरामप्रभां सिंचंतीममृतद्रवैरिव शिरो ध्यायंति मूर्ध्नि स्थिताम् अश्रां
तं विकटस्फुटाक्षरपदा निर्याति वक्त्रांबुजात् तेषां भारति भारती सुरसरित्कल्लोललोलो
र्मिवत् ८ ये सिंदूरपरागपुंजपिहितां त्वत्तेजसा द्यामिमां उर्वीं चापि विलीनयावकरस
प्रस्तारमग्नामिव पश्यंति क्षणमप्यनन्यमनसस्तेषामनंगज्वरक्लांतास्त्रस्तकुरंगशा
वकदृशो वश्या भवंति स्फुटं ९ चंचत्कांचनकुंडलांगदधरामाबद्धकांचीस्रजं ये त्वां
चेतसि तद्गते क्षणमपि ध्यायंति कृत्वा स्थिरां तेषां वेश्मसु विभ्रमादहरहः स्फारीभवं
त्यश्चिरं माद्यत्कुंजरकर्णतालतरलाः स्थैर्यं भजंते श्रियः १० आर्भट्या शशिखंडमंडित
जटाजूटां नृमुंडस्रजं बंधूकप्रसवारुणांबरधरां प्रेतासनाध्यासिनीं त्वां ध्यायंति चतु
र्भुजां त्रिनयनामापीनतुंगस्तनीं मध्ये निम्नवलित्रयांकिततनुं त्वद्रूपसंवित्तये ११ जातो

त्रि ल: ष्पत्यपरिक्रुद्दे हि त्रिभुजां सामान्यमात्रे कृते निःशेषा वतिच कवर्निपद्वीलब्धा प्रणापोन्नतिः यद्विशा
१६ धरस्तद्वंदितपदः श्रीवत्सराजोभवद्देवित्वच्चरणांबुजप्रणतिपः सोयंप्रसादोदयः १२ चंडित्वच्चर
णांबुजार्चनकृते विल्वीदलोल्लुंठनात्रुत्यत्कंठककोटिभिः परिचयं येषां न जग्मुः कराः ते दंड
कुशचक्रचापिकुलिशश्रीवत्समत्स्यांकितैः जायंते पृथिवीभुजां कथमिमा भोजप्रभैः पाणि
भिः १३ विप्राः क्षोणिभुजो विशस्तदितरे क्षीराज्यमध्वासवैस्त्वां देवि त्रिपुरे परापरकलां संतर्प्य पू
जाविधौ यां यां प्रार्थयते मनः स्थिरधियां तेषां तदेव ध्रुवं तां तां सिद्धिमवाप्नुवंति तरसा विघ्नैर
विघ्नीकृताः १४ शब्दानां जननी त्वमत्र भुवने वाग्वादिनीत्युच्यसे त्वत्तः केशववासवप्रभृतयो
प्याविर्भवंति ध्रुवं लीयंते खलु यत्र कल्पविरमे ब्रह्मादयस्तेप्यमी सा त्वं काचिदचिंत्यरूपमहि
मा शक्तिः परा गीयसे १५ देवानां त्रितयं त्रयी हुतभुजां शक्तित्रयं त्रिस्वराः त्रैलोक्यं त्रिपदी त्रिपु
ष्करमथो त्रिब्रह्म वर्णास्त्रयः यत्किंचिज्जगति त्रिधा नियमितं वस्तु त्रिवर्गात्मकं तत्सर्वं त्रि
पुरेति नाम भगवत्यन्वेति ते तत्त्वतः १६ लक्ष्मीराजकुलेजया रणभुवि क्षेमंकरी मध्वनि क्र
व्याद्द्विपसर्पभाजि शबरी कांतारदुर्गे गिरौ भूतप्रेतपिशाचजंबुकभये स्मृत्वा महाभै
रवी व्यामोहे त्रिपुरा तरंति विपदस्तारा च तोयप्लवे १७ माया कुंडलिनी क्रिया मधुमती का
ली कलामालिनी मातंगी विजया जया भगवती देवी शिवा शांभवी शक्तिः शंकरवल्लभा त्रि
नयनी वाग्वादिनी भैरवी ह्रींकारी त्रिपुरा परापरमयी माता कुमारीत्यसि १८ आईपल्लवि
तैः परस्परयुतैर्द्वित्रिक्रमाद्यक्षरैः काद्यैः क्षांतगतैः स्वरादिभिरथ क्षांतैश्च तैः सस्वरैः
नामानि त्रिपुरे भवंति खलु यान्यत्यंतगुह्यानि ते तेभ्यो भैरवपत्नि विंशतिसहस्रेभ्यः परे

ध्येो नमः १९ बोधव्या निपुणं बुधैः स्तुतिरियं कृत्वा मनस्तद्गतं भारत्यास्त्रिपुरेत्यनन्य
मनसो यत्राद्यवृत्ते स्फुटं एकद्वित्रिपदक्रमेण कथितस्तत्पादसंख्याक्षरैः मन्त्रोद्धा
रविधिर्विशेषसहितः सत्संप्रदायान्वितः २० सावद्यं निरवद्यमस्तु यदि वा किं वानया
चिन्तया नूनं स्तोत्रमिदं पठिष्यति जनैः यस्यास्ति भक्तिस्त्वयि संचिन्त्यापि लघुत्वमात्मनि दृढ
ं संजायमानं हठात्त्वद्भक्त्या मुखरीकृतेन रचितं तस्मान्मयापि ध्रुवं २१ श्रीनन्दे
न्दुवकं पद्मपूर्णानयनं निद्राहरा सात्विके वेदव्याकरणावगाहनगिरा नकोक्ति
मुक्तिप्रदम् वप्पाकषिपुरप्रवेशातगरक्षोभादिसिद्धाष्टकं लब्धीजाप्यमिदं
करीत्नु सनतं योगीश्वरः सधकवम् २२ देवि ज्ञावकापत्रिपार्वति सति त्रैलोक्य
मातः शिवे शर्वाणि त्रिपुरे मृडानि वरदे रुद्राणि कात्यायिनि भीमे भैरवि चण्डि
शर्वरि कालहत्ये शूलिनि त्वत्पादप्रणतानन्यमनसः पर्याकुलापाहि
नः २३ आईमपल्लरजनीचरविंदुनादमेकादरयरमिंदक्रमुकावदंति
मंत्रं क्षिये नभुवनत्रयमेकितं च सृष्टिस्थितिप्रलयहेतुमचिंत्यरूपं २४
इति श्रीलघ्वाचार्यविरचिते लघुस्तोत्रं संपूर्णं ॥ श्रीरामाय नमः हंसाय नमः
ॐ स्वस्ति श्रीगणेशाय नमः इंद्र उवाच इंद्राक्षी नाम सा देवी देवतैः समुदाहृता गौ
री शाकंभरी देवी दुर्गा नाम्नेति विश्रुता १ कात्यायिनी महादेवी चंद्रघंटा महा
त्रि

तथा गायत्री सा च सावित्री ब्रह्माणी ब्रह्मवादिनी २ नारायणी भद्रकाली रुद्राणी कृष्ण
उ.२ पिंगला अग्निज्वाला रौद्रमुखी कालरात्रिस्तपस्विनी ३ मेघश्यामा सहस्राक्षी
१२ विष्णुमाया जलोदरी महोदरी मुक्तकेशी घोररूपमहाबला ४ श्रुतिःस्मृ
तिर्धृतिर्मेधा विद्या लक्ष्मी सरस्वती अनन्ता विजया पूर्णा मानस्तोका पराजि
नी ५ भवानी पार्वती देवी हैमवत्यम्बिका शिवा एतैर्नामपदैर्दिव्यैः स्तु
ता च क्रेणधीमता ६ प्रातरुत्थाय ये चास्तु मुच्यन्ते सर्वबन्धनात् धर्मार्थका
ममोक्षाणां भाजनं स तु जायते ७ यश्च पठते नित्यं स्तोत्रं सर्वपापैः प्रमु
च्यते अपुत्रो लभते पुत्रं बद्धो मुच्येत बन्धनात् ८ संग्रामे जयमाप्नोति म
हामायाप्रसादतः आवर्तनसहस्रेण लभते जयमंगलं ९ धनपुत्रान्तदासा
णनूपो मुच्यान् स नतं जपेन्न इन्द्राक्षी कपिसम्पर्कं सत्यमेव न संशयः १०
इति इन्द्राक्षीस्तोत्रं समाप्तम् शुभं श्रीगणेशाय नमः ओं नमः शिवाय ॥
ओं महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि
गिरः अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन्ममाप्येष स्तोत्रे हर निरप
वादः परिकरः १ अतीतः पन्थानं तव च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं चकि
तमभिधत्ते श्रुतिरपि स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः पदे त्वर्वाची
ने पतति न मनः कस्य न वचः २ मधुस्फीता वाचः परमममृतं निर्मितवत

त

स्तवब्रह्मन्किंवागपिसुरगुरोर्विस्मयपदं ममत्वेतांवाणीं गुणकथनपुण्येनभवतः पुनामीत्य
र्थेस्मिन्पुरमथनबुद्धिर्व्यवसिता ३ तवैश्वर्यंयत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तुव्यस्तंतिसृ
षुगुणभिन्नासुतनुषु अभव्यानामस्मिन्वरदरमणीयामरमणीं विहन्तुंव्याक्रोशींविदधतइहै
केजडधियः ४ किमीहः किंकायः सखलुकिमुपायस्त्रिभुवनं किमाधारोधातासृजतिकि
मुपादानइतिच अतर्क्यैश्वर्येत्वय्यनवसरदुःस्थोहतधियः कुतर्कोयंकांश्चिन्मुखरयति
मोहायजगतः ५ अजन्मानोलोकाः किमवयववन्तोपिजगतामधिष्ठातारंकिंभवविधि
रनादृत्यभवति अनीशोवाकुर्याद्भुवनजननेकः परिकरोयतोमन्दास्त्वांप्रत्यमरवरसं
शेरतइमे ६ त्रयीसांख्ययोगः पशुपतिमतंवैष्णवमितिप्रभिन्नेप्रस्थानेपरमिदमदः
पथ्यमितिच रुचीनांवैचित्र्यादृजुकुटिलनानापथजुषां नृणामेकोगम्यस्त्वम
सिपयसामर्णवइव ७ महोक्षः खट्वाङ्गंपरशुरजिनंभस्मफणिनः कपालंचेतीयत्तव
वरदतन्त्रोपकरणं सुरास्तांतामृद्धिंविदधतिभवद्भ्रूप्रणिहितां नहिस्वात्मारामंविषयमृगतृ
ष्णाभ्रमयति ८ ध्रुवंकश्चित्सर्वंसकलमपरस्त्वध्रुवमिदंपरोध्रौव्याध्रौव्येजगतिगदतिव्य
स्तविषये समस्तेप्येतस्मिन्पुरमथनतैर्विस्मितइव स्तुवंजिह्रेमित्वांनखलुननुधृ
ष्टामुखरता ९ तवैश्वर्यंयत्नाद्यदुपरिविरिंचोहरिरधः परिच्छेत्तुंयातावनलमनिल
स्कंधवपुषः ततोभक्तिश्रद्धाभरगुरुगृणद्भ्यांगिरिशयत्स्वयंतस्थेताभ्यांतवकिम
नुवृत्तिर्नफलति १० अयत्नादापाद्यत्रिभुवनमवैरव्यतिकरंदशास्योयद्बाहू

म. नभृत रणकण्डूपरवशान् शिरःपद्मश्रेणीरचितचरणांभोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहरविस्फूर्जि
१८ तमिदं ॥ अमुष्य त्वत्सेवासमधिगतसारं भुजवनं बलात्कैलासेपि त्वदधिवसतौ विक्रमयतः अल
भ्या पातालेप्यलसचलितांगुष्ठशिरसि प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः १२ यदृद्धिं सु
त्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बाणः परिजनविधेयस्त्रिभुवनं न तच्चित्रं तस्मिन्वरिव
सितरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः १३ अकाण्डब्रह्माण्डक्षयचकित
देवासुरकृपाविधेयस्यासीद्यस्त्रिनयन विषं संहृतवतः स कल्माषः कण्ठे तव न कुरुते न
श्रियमहो विकारोपि श्लाघ्यो भुवनभयभंगव्यसनिनः १४ असिद्धार्था नैव क्वचिदपि सदेवा
सुरनरे निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः स पश्यन्नीश त्वामितरसुरसाधारणम
भूत्स्मरः स्मर्तव्यात्मा न हि वशिषु पथ्यः परिभवः १५ मही पादाघाताद्व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणं मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा जग
द्रक्षायै त्वं नटसि ननु वामैव विभुता १६ वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः प्र
वाहो वारां यः पृषतलघुदृष्टः शिरसि ते जगद्द्वीपाकारं जलधिवलयं तेन कृतमित्यने
नैवोन्नेयं धृतमहिम दिव्यं तव वपुः १७ रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो रथांगे च
न्द्रार्कौ रथचरणपाणिः शर इति दिधक्षोस्ते कोयं त्रिपुरतृणमाडम्बरविधिर्विधेयैः क्रीड
न्त्यो न खलु परतन्त्राः प्रभुधियः १८ हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने त
स्मिन्निजमुदहरन्नेत्रकमलं गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां र
क्षायै त्रिपुरहर जागर्ति जगतां १९ क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां क्व कर्म
प्रध्वस्तं फलति पुरुषाराधनमृते अतस्त्वां संप्रेक्ष्य क्रतुषु फलदानप्रतिभुवं

स्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसु जनः २० क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृ
षीणामार्त्विज्यं शरणद सदस्याः सुरगणाः क्रतुभ्रंशस्त्वत्तः क्रतुफलदानव्यसनिनो ध्रुवं कर्तुः
श्रद्धाविधुरमभिचाराय हि मखाः २१ प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतं
रिरमयिषुमृष्यस्य वपुषा धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं तेऽद्यापि त्यजति न मृ
गव्याधरभसः २२ स्वलावण्याशंसा धृतधनुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पा
५ युधमपि यदि स्त्रैणं देवी यमनिरत देहार्धघटनादवैति त्वामद्धा बत वरद मुग्धा युवतयः २३ श्म
शानेष्वाक्रीडा स्मरहर पिशाचाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः अ
मङ्गल्यं शीलं तव भवतु नामैवमखिलं तथापि स्मर्तॄणां वरद परमं मङ्गलमसि २४ मनः
प्रत्यक्चित्ते सविधमविधायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः यदालोक्या
ह्लादं ह्रद इव निमज्यामृतमये दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान् २५ त्वमर्क
स्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च परिच्छिन्ना
मेवं त्वयि परिणता बिभ्रतु गिरं न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि २६ त्रयीं तिस्रो वृत्तीस्त्रिभु
वनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति तुरीयं ते धाम ध्वनिभिरवरुन्धा
नमणुभिः समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदं २७ भवः शर्वो रुद्रः पशुपतिरथोग्रः
सहमहांस्तथा भीमेशानाविति यदभिधानाष्टकमिदं अमुष्मिन्प्रत्येकं प्रविचरति देव
श्रुतिरपि प्रियायास्मै धाम्ने प्रणिहितनमस्योऽस्मि भवते २८ नमो नेदिष्ठाय प्रियदव द
विष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः नमो वर्षिष्ठाय त्रिनयन य
विष्ठाय च नमो नमः सर्वस्मै ते तदिदमिति सर्वाय च नमः २९ बहुलरजसे विश्वोत्पत्तौ

नौभवायनमोनमः प्रबलतमसेतत्संहारेहरायनमोनमः जनसुखकृतेसत्वोद्रिक्तौमृडायनमोन
म॰ मः प्रमहसिपदेनिस्त्रैगुण्येशिवायनमोनमः ३० कृशपरिणतिचेतः क्लेशवश्यंक्वचेदंक्वचतव
१९ गुणसीमोल्लंघिनीशश्वदृद्धिः इतिचकितममंदीकृत्यमांभक्तिराधाद्वरदचरणयोस्तेवाक्यपुष्पो
पहारं ३१ असितगिरिसमंस्यात्कज्जलंसिंधुपात्रेसुरतरुवरशाखालेखनीपत्रमुर्वी लिख
तियदिगृहीत्वाशारदासर्वकालंतदपितवगुणानामीशपारंनयाति ३२ असुरसुरमुनींद्रै
रर्चितैःसिंधुमौलेर्ग्रथितगुणमहिम्नोनिर्गुणस्येश्वरस्य सकलसुखवरिष्ठः पुष्पदंताभिधानो
रुचिरमलघुवृत्तैःस्तोत्रमेतच्चकार ३३ अहरहरनवद्यंधूर्जटेःस्तोत्रमेतत्पठतिपरमभक्त्या
शुद्धचित्तःपुमान्यः सभवतिशिवलोकेरुद्रतुल्यःसदात्रप्रचुरतरधनायुःपुत्रवान्कीर्तिमांश्च ३४
दीक्षादानंतपस्तीर्थंहोमयागादिकाःक्रियाः महिम्नस्तवपाठस्यकलांनार्हंतिषोडशीं ३५ समा
प्तंचसमेस्तोत्रंसर्वमीश्वरवर्णितं अनुपमंमनोहारिपुण्यंगंधर्वभाषितं ३६ महेशान्नापरो
देवोमहिम्नोनापरास्तुतिः अघोरान्नापरोमंत्रोनास्तितत्वंगुरोःपरं ३७ कुसुमदशननामा
सर्वगंधर्वराजः शशिधरवरमौलेर्देवदेवस्यदासः सगुरुनिजमहिम्नोभ्रष्टएवास्यरोषा
त्स्तवनमिदमकार्षीद्दिव्यदिव्यंमहिम्नः ३८ सुरवरमुनिपूज्यंस्वर्गमोक्षैकहेतुंप
ठतियदिमनुष्यः प्रांजलिर्नान्यचेताः व्रजतिशिवसमीपंकिन्नरैःस्तूयमानःस्तवनमि
दममोघंपुष्पदंतप्रणीतं ३९ श्रीपुष्पदंतमुखपंकजनिर्गतेनस्तोत्रेणकिल्बिषहरे
णहरप्रियेण कंठस्थितेनपठितेनसमाहितेनसुप्रीणितोभवतिभूतपतिर्महे
शः ४० इतिश्रीपुष्पदंताचार्यविरचितंमहिम्नाख्यस्तोत्रंसंपूर्णं ॥शुभं॥

ॐश्रीगणेशायनमः ॐशिवःशक्त्यायुक्तोयदिभवतिशक्तःप्रभवितुंनचेदेवंदेवोनखलुकुशलःस्प
न्दितुमपि अतस्त्वामाराध्यांहरिहरविरिंच्यादिभिरपि प्रणंतुंस्तोतुंवाकथमकृतपुण्यःप्र
भवति १ तनीयांसंपांसुंतवचरणपंकेरुहभवंविरिंचिःसंचिन्वन्विरचयतिलोकानविकलम् व
हत्येनंशौरिःकथमपिसहस्रेणशिरसां हरःसंक्षुभ्यैनंभजतिभसितोद्धूलनविधिं २ अवि
द्यानामंतस्तिमिरमिहिरोद्दीपनकरीजडानांचैतन्यस्तवकमकरंदश्रुतिसिरा दरिद्राणां
चिंतामणिगुणनिकाजन्मजलधौनिमग्नानांदंष्ट्रामुररिपुवराहस्यभवती ३ त्वदन्यः
पाणिभ्यामभयवरदोदैवतगणस्त्वमेकानैवासिप्रकटितवराभीत्यभिनया भयात्त्रातुंदा
तुंफलमपिचवांछासमधिकंशरण्येलोकानांतवहिचरणावेवनिपुणौ ४ हरिस्त्वामारा
ध्यप्रणतजनसौभाग्यजननींपुरानारीभूत्वापुररिपुमपिक्षोभमनयत् स्मरोपित्वांनत्वारति
नयनलेह्येनवपुषामुनीनामप्यंतःप्रभवतिहिमोहायमहतां ५ धनुःपौष्पंमौर्वीमधु
करमयीपंचविशिखावसंतःसामंतोमलयमरुदायोधनरथः तथाप्येकःसर्वंहिमगिरि
सुतेकामपिकृपामपांगात्तेलब्ध्वाजगदिदमनंगोविजयते ६ क्वणत्कांचीदामाकरि
कलभकुंभस्तननतापरिक्षीणामध्येपरिणतशरच्चंद्रवदना धनुर्बाणान्पाशंसृणिमपिद
धानाकरतलैः पुरस्तादास्तांनःपुरमथितुराहोपुरुषिका ७ सुधासिंधोर्मध्येसुरविटपि
वाटीपरिवृते मणिद्वीपेनीपोपवनवतिचिंतामणिगृहे शिवाकारेमंचेपरम
शिवपर्यंकनिलयांभजंतित्वांधन्याःकतिचनचिदानंदलहरीम् ८ महींमूलाधारे
कमपिमणिपूरेहुतवहंस्थितंस्वाधिष्ठानेहृदिमरुतमाकाशमुपरि मनोपिभ्रू

मध्ये सकलमपि भित्वा कुलपथं सहस्रारे पद्मे सह रहसि पत्या विहरसि ९ सुधाधारासारैश्चरणक
सौ. मलान्तर्विगलितैः प्रपंचं सिंचंती पुनरपि रसाम्नायमहसां अवाप्य स्वां भूमिं भुजगनिभमध्यु
२० ष्टवलयं स्वमात्मानं कृत्वा स्वपिषि कुलकुण्डे कुहरिणि १० चतुर्भिः श्रीकंठैः शिवयुवतिभि
पंचभिरपि प्रभिन्नाभिः शंभोर्नवभिरपि मूलप्रकृतिभिः त्रयश्चत्वारिंशद्वसुदलकलाश्र
त्रिवलयत्रिरेखाभिः सार्धं तव भवनकोणाः परिणताः ११ त्वदीयं सौंदर्यं तुहिनगिरिकन्ये तु
लयितुं कवीन्द्राः कल्पंते कथमपि विरिंचिप्रभृतयः यदालोकौत्सुक्यादमरललना या
न्ति मनसा तपोभिर्दुःप्राप्यामपि गिरिशसायुज्यपदवी १२ नरं वर्षीयांसं नयनविरसं नर्म
सु जडं तवापांगालोके पतितमनुधावंति शतशः गलद्वेणीबंधाः कुचकलश
विस्रस्तसिचया हठात्त्रुट्यत्कांच्यो विगलितदुकूला युवतयः १३ क्षितौ षट्पंचाशद्द्वि
समधिकपंचाशदुदके हुताशे द्वाषष्टिश्चतुरधिकपंचाशदनिले दिवि द्विः षट्त्रि
शन्मनसि च चतुःषष्टिरिति ये मयूखास्तेषामप्युपरि तव पादाम्बुजयुगं १४ शरज्ज्यो
त्स्ना शुभ्रां शशियुतजटाजूटमकुटां वरत्रासत्राणस्फटिकगुटिकापुस्तककरां
सकृन्न त्वा नत्वा कथमिव सतां सन्निदधते मधुक्षीरद्राक्षामधुरिमधुरीणा भणितयः
१५ कवीन्द्राणां चेतःकमलवनबालातपरुचिं भजंते ये संतः कतिचिदरुणामेव
भवतीं विरिंचिप्रेयस्यास्तरुणतरशृंगारलहरीगभीराभिर्वाग्भिर्विदधति सतां र
ञ्जनममी १६ सवित्रीभिर्वाचां शशिमणिशिलाभंगिरुचिभिः वशिन्याद्याभिस्त्वां स
ह जननि संचिंतयति यः स कर्ता काव्यानां भवति महतां भंगिसुभगैर्वचोभिर्वाग्देवी
वदनकमलामोदमधुरैः १७ तनुच्छायाभिस्ते तरुणतरणिश्रीसरणि

भिर्दिवं सर्वामुर्वीमरुणिमनिमग्नां स्मरति यः भवंत्यस्य त्रस्यद्वनहरिणशालीननयनाः सहोर्वश्या वश्याः क
ति कति न गीर्वाणगणिकाः १८ मुखं बिंदुं कृत्वा कुचयुगमधस्तस्य तदधो हरार्धं ध्यायेद्यो हरमहिषि ते म
न्मथकलां स सद्यः संक्षोभं नयति वनिता इत्यतिलघु त्रिलोकीमप्याशु भ्रमयति रवींदुस्तनयुगां १९ कि
रंतीमंगेभ्यः किरणनिकुरंबामृतरसं हृदि त्वामाधत्ते हिमगिरिशिलामूर्तिमिव यः स सर्पाणां दर्पं शम
यति शकुंताधिप इव ज्वरप्लुष्टान्दृष्ट्या सुखयति सुधाधारसिरया २० तडिल्लेखातन्वीं तपनशशिवैश्वा
नरमयीं निषण्णां षण्णामप्युपरि कमलानां तव कलां ॥ महापद्माटव्यां मृदितमलमायेन मनसा म
हांतः पश्यंतो दधति परमाह्लादलहरीं २१ भवानि त्वं दासे मयि वितर दृष्टिं सकरुणामिति स्तोतुं वांछ
न्कथयति भवानि त्वमिति यः तदैव त्वं तस्मै दिशसि निजसायुज्यपदवीं मुकुंदब्रह्मेंद्रस्फुटमकुटनीरा
जितपदां २२ त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा शरीरार्धं शंभोरपरमपि शंके हृतमभूत् य
दाहि त्वद्रूपं सकलमरुणाभं त्रिनयनं कुचाभ्यामानम्रं कुटिलशशिचूडालमकुटं २३ जगत्सू
ते धाता हरिरवति रुद्रः क्षपयते तिरस्कुर्वन्नेतत्स्वमपि वपुरीशस्तिरयते सदापूर्वः सर्वं तदिदमनु
गृह्णाति च शिवस्तवाज्ञामालंब्य क्षणचलितयोर्भ्रूलतिकयोः २४ त्रयाणां देवानां त्रिगुणजनितानां
त्रिनयने भवेत्पूजा पूजा तव चरणयोर्या विरचिता तथा हि त्वत्पादोद्वहनमणिपीठस्य निकटे
स्थिता ह्येते शश्वन्मुकुलितकरोत्तंसमकुटाः २५ विरिंचिः पंचत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निधनं वितंद्री माहेंद्री विततिरपि संमीलितदृशा म
हासंहारेस्मिन्विहरति सति त्वत्पतिरसौ २६ जपो जल्पः शिल्पं सकलमपि मुद्राविरच
ना गतिः प्रादक्षिण्यभ्रमणमशनाद्याहुतिविधिः प्रणामः संवेशः सुखमखिलमात्मार्प

सौ०
२१

णहृष्टा सपर्यापर्यायस्तव भवतु यन्मे विलसितं २७ सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरिणीं विपद्य
न्ते विश्वे विधिशतमखाद्या दिविषदः करालं यत्क्ष्वेडं कवलितवतः कालकलना न शम्भोस्तन्मूलं
तव जननि ताटंकमहिमा २८ ददाने दीनेभ्यः श्रियमनिशमाशानुसदृशीममंदं सौंदर्यस्तवक
मकरंदं विकिरती तवास्मिन्मंदारस्तवकसुभगे यातु चरणे निमज्जन्मज्जीवः करणचरणैः षट्
चरणतां २९ किरीटं वैरिंचं परिहर पुरः कैटभभिदः कठोरे कोटीरे स्खलसि जहि जम्भारिमु
कुटं प्रणम्रेष्वेतेषु प्रसभमभियातस्य भवनं भवस्याभ्युत्थाने तव परिजनोक्तिर्विजयते ३० चतुःष
ष्ट्या तंत्रैः सकलमतिसंधाय भुवनं स्थितस्तत्तत्सिद्धिप्रसवपरतंत्रैः पशुपतिः पुनस्त्वन्निर्बंधाद
खिलपुरुषार्थैकघटनास्वतंत्रं ते तंत्रं क्षितितलमवातीतरदिदं ३१ शिवः शक्तिः कामः क्षितिरथर
विः शीतकिरणः स्मरो हंसः शक्रस्तदनु च परामारहरयः अमी हृल्लेखाभिस्तिसृभिरवसानेषु घ
टिता भजंते वर्णास्ते तव जननि नामावयवतां ३२ स्मरं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनो
र्निधायैके नित्ये निरवधिमहाभोगरसिकाः जयंति त्वां चिंतामणिगुणनिबद्धाक्षवलयाः शिवा
ग्नौ जुह्वंतः सुरभिघृतधाराहुतिशतैः ३३ शरीरं त्वं शंभोः शशिमिहिरवक्षोरुहयुगं तवात्मा
नं मन्ये भगवति भवात्मानमनघं अतः शेषः शेषीत्ययमुभयसाधारणतया स्थितः संबंधो
वां समरसपरानंदपरयोः ३४ मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि त्वमापस्त्वं भूमिस्त्व
यि परिणतायां न हि परं त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा चिदानंदाकारं शि
वयुवति भावेन बिभृषे ३५ तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं परं शंभुं वंदे परिमि
लितपार्श्वं परचिता यमाराध्यं भक्त्या रविशशिशुचीनामविषये निरालोके लोके

निवसति हि भालोकभवने ३६ विशुद्धौ ते शुद्धस्फटिकविशदं व्योमजनकं शिवं सेवे देवीमपि शि
वसमानव्यवसितां ययोः कान्त्या यान्त्याः शशिकिरणसारूप्यसरणिं विधूतान्तर्ध्वान्ता विलसति चकी
रीव जगती ३७ समुन्मीलत्संवित्कमलमकरन्दैकरसिकं भजे हंसद्वन्द्वं किमपि महतां मानस
चरं यदालापादष्टादशगुणितविद्यापरिणतिर्यदादत्ते दोषाद्गुणमखिलमद्भ्यः पय इव ३८
तडित्वन्तं शक्त्या तिमिरपरिपन्थिस्फुरणया स्फुरन्नानारत्नाभरणपरिणद्धेन्द्रधनुषं तव
श्यामं मेघं कमपि मणिपूरैकशरणं निषेवे वर्षन्तं हरमिहिरतप्तं त्रिभुवनं ३९ तव स्वाधिष्ठाने
हुतवहमधिष्ठाय निरतं तमीडे संवर्तं जननि महतीं तां च समयां यदालोके लोकान्दहति म
हति क्रोधकलिते दयार्द्रा या दृष्टिः शिशिरमुपचारं रचयति ४० तवाधारे मूले सह समय
या लास्यपरया नवात्मानं वन्दे नवरसमहाताण्डवनटं उभाभ्यामेताभ्यामुभयविधिमुद्दि
श्य दयया सनाथाभ्यां जज्ञे जनकजननीमज्जगदिदं ४१ गतैर्माणिक्यत्वं गगनमणि
भिः सान्द्रघटितं किरीटं ते हैमं हिमगिरिसुते कीर्तयति कः तमीडेयच्छायाच्छुरणशबलं च
न्द्रकलिकं धनुः शौनासीरं किमिदमिति बध्नाति धिषणां ४२ धुनोतु ध्वान्तं नस्तुलितदलितेन्दी
वरवनं घनस्निग्धं श्यामं चिकुरनिकुरम्बं तव शिवे यदीयं सौरभ्यं सहजमुपलब्धुं सुमन
सो वसन्त्यस्मिन्मन्ये वलमथनवाटीविटपिनां ४३ वहन्ती सिन्दूरं प्रबलकबरीभारति
मिरं त्विषां वृन्दैर्बन्दीकृतमिव नवीनार्ककिरणं तनोतु क्षेमं नस्तव वदनसौन्दर्यलहरी
परीवाहस्रोतःसरणिरिव सीमन्तसरणिः ४४ अरालैः स्वाभाव्यादलिकलभसश्री
भिरलकैः परीतं ते वक्त्रं परिहसति पङ्केरुहरुचिं दरस्मेरे यस्मिन्दशनरुचिकिञ्ज
ल्करुचिरे सुगन्धौ माद्यन्ति स्मरदहनचक्षुर्मधुलिहः ४५ ललाटं लावण्यद्युति वि

सौ मलमाभाति तव यद्द्वितीयं तन्मन्ये मुकुटघटितं शशिखण्डस्य शकलं विपर्यासन्यासादुभयमपि संभूय च
मिथः सुधालेपस्यूतिः परिणमति राकाहिमकरः ४६ भ्रुवौ भुग्ने किंचिद्भुवनभयभंगव्य
२२ सनिनि त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगुणे धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः प्र
कोष्ठे मुष्टौ च स्थगयति निगूढांतरमिदं ४७ अहः सूते सव्यं तव नयनमर्कात्मकतया त्रिया
मां वामं ते सृजति रजनीनायकमय तृतीया ते दृष्टिर्दरदलितहेमांबुजरुचिः समाधत्ते संध्यां दि
वसनिशयोरंतरचरीं ४८ विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः कृपाधाराधारा
किमपि मधुराभोगवतिका अवंती दृष्टिस्ते बहुनगरविस्तारविजया ध्रुवं तत्तन्नामव्यव
हरणयोग्या विजयते ४९ कवीनां संदर्भस्तबकमकरंदैकरसिकं कटाक्षव्याक्षेपभ्र
मरकलभौ कर्णयुगलं अमुंचंतौ दृष्ट्वा तव नवरसास्वादतरलावसूयासंसर्गादलिक
नयनं किंचिदरुणं ५० शिवे शृंगारार्द्रा तदितरजने कुत्सनपरा सरोषा गंगायां गिरिशच
रिते विस्मयवती हराहिभ्यो भीता सरसिरुहसौभाग्यजयिनी सखीषु स्मेरा ते मयि जन
नि दृष्टिः सकरुणा ५१ गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती पुरां भेत्तुश्चित्तप्रश
मरसविद्रावणफले इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके तवाकर्णाकृष्टस्म
रशरविलासं कलयतः ५२ विभक्तत्रैवर्ण्यं व्यतिकरितलीलांजनतया विभाति त्व
न्नेत्रत्रितयमिदमीशानदयिते पुनः स्रष्टुं देवान्द्रुहिणहरिरुद्रानुपरतान् रजः
सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिदं ५३ पवित्रीकर्तुं नः पशुपतिपराधीनहृदये
दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः नदः शोणो गंगा तपनतनयेति ध्रुव

ममुद्रयाणां तीर्थानामुपनयसि संभेदमनघे ५४ तवापर्णी कर्णेजपनयनपैशुन्यचतुः
किता विलीयन्ते त्वत्तो ये निधनमनिकोपोटङ्कवलयं) शोभाः प्राफरिकाः इयं च श्रीकुन्दकुन्द
पुटकपाटं कुवलयन्नन्तिप्रान्तस्थैर्निशितविशिखव्याप्तविशति ५५ निमेषोन्मेषाभ्यां प्रल
यमुदयं याति जगती तवेत्याहुः संतो धरणिधरराजन्यतनये त्वदुन्मेषाज्जातं जगदिदम
शेषं प्रलयतः परित्रातुं शङ्के परिहृतनिमेषास्तव दृशः ५६ दृशा द्राघीयस्या दरदलि
तनीलोत्पलरुचा दवीयांसं दीनं स्नपय कृपया मामपि शिवे अनेनायं धन्यो भवति
न च ते हानिरियता वने वा हर्म्ये वा समकरनिपातो हिमकरः ५७ अरालं ते पालीयुगल
मगराजन्यतनये न केषामाधत्ते कुसुमशरकोदण्डकुतुकं तिरश्चीनो यत्र श्रवणपथ
मुल्लङ्घ्य विलसन्नपाङ्गव्यासङ्गो दिशति शरसंधानधिषणां ५८ स्फुरद्गण्डाभोगप्रतिफ
लिततार्टङ्कयुगलं चतुश्चक्रं मन्ये तव मुखमिदं मन्मथरथं यमारुह्य द्रुह्यत्यवनिरथ
[margin: म] केन्दुचरणं महावीरो मारः प्रमथपतये सज्जितवते ५९ सरस्वत्याः सूक्तीरमृतलहरीकौशल [margin: ल]
लहरीः पिबन्त्याः शर्वाणि श्रवणचुलुकाभ्यामविरलं चमत्कारश्लाघाचलितशिरसः कुण्ड
लगणो झणत्कारैस्तारैः प्रतिवचनमाचष्ट इव ते ६० असौ नासावंशस्तुहिनगिरिवं
शध्वजपटि त्वदीयो नेदीयः फलतु फलमस्माकमुचितं वहन्नन्तर्मुक्ताः शिशिर
रनरन्ध्रनिःश्वासघटिताः समृद्ध्या यस्तासां बहिरपि च मुक्तामणिधरः ६१ प्रकृत्यारक्ता
यास्तव सुदति दन्तच्छदरुचेर्वक्ष्ये सादृश्यं जनयतु फलं विद्रुमलता न बिम्बं तद्बिम्ब
प्रतिफलनरागादरुणितं तुलामध्यारोढुं कथमिव विलज्जेत कलया ६२ स्मितज्यो
त्स्नाजालं तव वदनचन्द्रस्य पिबतां चकोराणामासीदतिरसतया चञ्चुजडिमा अः

सौं
२३

तस्ते शीतांशोरमृतलहरीमम्लरुचयः पिबंति स्वछंदं निशि निशि भृशं कांजिकधिया ६३ अविश्रां
तं पत्युर्गुणगणकथाम्रेडनजपा जपापुष्पछाया तव जननि जिह्वा जयति सा यदग्रासीनायाः स्फ
टिकदृषदछछविमयी सरस्वत्या मूर्तिः परिणमति माणिक्यवपुषा ६४ रणे जित्वा दैत्यानप
हृतशिरस्त्रैः कवचिभिर्निवृत्तैश्चंडांशत्रिपुरहरनिर्माल्यविमुखैः विशाखेंद्रोपेंद्रैः शशिविश
दकर्पूरशकला विलीयंते मातस्तव वदनतांबूलकबला ६५ विपंच्या गायंती विविधमपदान
पशुपतेस्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने तदीयैर्माधुर्यैरपलपिततंत्रीकलरवां नि
जां वीणां वाणी निचुलयति चोलेन निभृतं ६६ कराग्रेण स्पृष्टं तुहिनगिरिणा वत्सलतया
गिरीशेनोदस्तं मुहुरधरपानाकुलतया करग्राह्यं शंभोर्मुखमुकुरवृंतं गिरिसुते कथंका
रं ब्रूमस्तव चिबुकमौपम्यरहितं ६७ भुजाश्लेषान्नित्यं पुरदमयितुः कंटकवती तव ग्रीवा ध
त्ते मुखकमलनालश्रियमियं स्वतः श्वेता कालागुरुबहुलजंबालमलिना मृणाली
लालित्यं वहति यदधो हारलतिका ६८ गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे विवाह
व्यानद्धत्रिगुणगणसंख्याप्रतिभुवः विराजंते नानाविधमधुररागाकरभुवां त्रया
णां ग्रामाणां स्थितिनियमसीमान इव ते ६९ मृणालीमृद्वीनां तव भुजलतानां चतसृ
णां चतुर्भिः सौंदर्यं सरसिजभवः स्तौति वदनैः नखेभ्यः संत्रस्यन्प्रथममथनादंधक
रिपोश्चतुर्णां वक्त्राणां सममभयहस्तार्पणधिया ७० नखानामुद्योतैर्नवनलिनरागं
विहसतां कराणां ते कांतिं कथय कथयामः कथमुमे कदाचिद्वा साम्यं व्रजतु विधि
यादृत्तं कमलं यदि क्रीडल्लक्ष्मीचरणतललाक्षारसदलं ७१ समं देवि स्कंदद्विपव
दनपीतं स्तनयुगं तवेदं नः खेदं हरतु सततं प्रस्नुतमुखं यदालोक्याशंकाकुलि

तवहृदयोल्लासजनकः स्तनकुंभोहेरंबः परिम्लाति हृत्तेन जटिति ७२ अमूं ते वक्षोजावमृत
रसमाणिक्यकलशौ न संदेहस्पंदो नगपतिपताके मनसि नः पिबंतौ तौ यस्मादविदितवधू
संगमरसौ कुमारावद्यापि द्विरदवदनक्रौंचदलनौ ७३ वहत्यंब स्तंबेरमदनुजकुंभप्रकृतिभिः
समारब्धां मुक्तामणिभिरमलां हारलतिकां कुचाभोगो बिंबाधररुचिभिरंतः शबलितां प्रता
पव्यामिश्रां पुरदमयितुः कीर्तिमिव ते ७४ उच्चैस्सद्यः स्तनतटघटितं उर्ध्वासविदुदोकषं
नोद्दामूले कनककलशाभोकलयतः तव शातं भंगाद लमिलितविलग्नं तनुभुवा त्रिधा
नद्धं देवि त्रिवलिलवलीवल्लिभिरिव ७५ तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः पयः पारा
वारः परिवहति सारस्वतमिव दयावत्या दत्तं द्रविडशिशुरास्वाद्य तव यत्कवीनां प्रौढानाम
जनि कमनीयः कवयिता ७६ हरक्रोधज्वालावलिभिरवलीढेन वपुषा गभीरे ते ना
भीसरसि कृतसंगो मनसिजः समुत्तस्थौ तस्मादचलतनये धूमलतिका जनस्तां जानी
ते जननि तव रोमावलिरिति ७७ यदेतत्कालिंदीतनुतरतरंगाकृति शिवे कृशे किंचि
न्मध्ये भवति तव तज्ज्ञाति सुधियां विमर्दादन्योन्यं कुचकलशयोरंतरगतं तनूभूतं व्योम ल
प्रविशदिव नाभी कुहरिणीं ७८ स्थिरो गंगावर्तः स्तनमुकुलरोमावलिलताजलावाल
कुंडं कुसुमशरतेजोहुतभुजः रतेर्लीलागारं किमपि तव नाभी गिरिसुते बिलद्वारं
सिद्धेर्गिरिशनयनानां विजयते ७९ निसर्गक्षीणस्य स्तनतटभरेण क्लमजुषो नमन्मू
र्तेर्नाभौ वलिषु शनकैस्त्रुट्यत इव चिरं ते मध्यस्य त्रुटिततटिनीतीरतरुणा समाव।
स्थास्थेम्नो भवतु कुशलं शैलतनये ८० गुरुत्वं विस्तारं क्षितिधरपतिः पार्वति नि।

सौं·   ज्ञानितं वा दाक्षिणत्वयि हरणाद्रूपेण निदधे अतस्ते विस्तीर्णो गुरुरयमशेषां वसुमतीं नितंबप्रा
ग्भारः स्थगयति लघुत्वं नयति च ८१ करींद्राणां शुंडाः कनककदलीकांडपटलीमुभाभ्या
२४   मूरुभ्यामुभयमपि निर्जित्य भवती सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते विधिज्ञे
जानुभ्यां विबुधकरिकुंभद्वयमपि ८२ पराजेतुं रुद्रं द्विगुणशरगर्भौ गिरिसुते निषंगौ जंघे
ते विषमविशिखो बाढमकृत यदग्रे दृश्यंते दशशरफलाः पादयुगलीनखाग्रच्छद्मानः
सुरमुकुटशाणैकनिशिता ८३ श्रुतीनां मूर्धानो दधति तव यौ शेखरतया ममाप्येतौ।
धे   मातः शिरसि दयया धेहि चरणौ ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी ययोर्ला
क्षालक्ष्मीररुणहरचूडामणिरुचिः ८४ हिमानीहंतव्यं हिमगिरिनिवासैकचतुरौ निशायां
निद्राणं निशि च परभागे च विशदौ परं लक्ष्मीपात्रं श्रियमपि सृजंतौ समयिनां सरोजं त्व
त्पादौ जननि जयतश्चित्रमिह किं ८५ नमोवाकं ब्रूमो नयनरमणीयाय पदयोस्त
वास्मै द्वंद्वाय स्फुटरुचिरसालक्तकवते असूयत्यत्यंतं यदभिहननाय स्पृहयते पशूनामी
पत्र   शानः प्रमदवनकंकेलितरवे ८६ मृषाकृत्वा गोत्रस्खलितमथ वैलक्ष्यनमितं लला
टे भर्तारं चरणकमले ताडयति ते चिरादंतः शल्यं दहनकृतमुन्मीलितवता तुलाको
टिक्काणैः किलिकिलितमीशानरिपुणा ८७ पदं ते कांतीनां प्रपदमपदं देवि विपदां
वांछनीनं सद्भिः कठिनकमठीखर्परतुलां कथं वा बाहुभ्यामुपयमनकाले पुरभिदा
तदादाय न्यस्तं दृषदि दयमानेन मनसा ८८ नखैर्नाकस्त्रीणां करकमलसंकोच
शशिभिस्तरूणां दिव्यानां हसत इव ते चंडि चरणौ फलानि स्वस्थेभ्यः किशलय

करग्रेणादत्तां दरिद्रेभ्यो भद्रां श्रियमनिशमह्नाय ददतौ ८९ कदा काले मातः कथय कलि
तालक्तकरसं पिबेयं विद्यार्थी तव चरणनिर्णेजनजलम् प्रकृत्या मूकानामपि च कविता-
कारणतया यदा धत्ते वाणीमुखकमलताम्बूलरसतां ९० पदन्यासक्रीडापरिचयमि
वारब्धुमनसः स्खलन्तस्ते खेलं भवनकलहंसा न जहति स्तु विदेये शिक्षां सुभगमणिम
ञ्जीररणितच्छलादाचक्षाणं चरणकमलं चारुचरिते ९१ अराला केशेषु प्रकृतिस
रला मन्दहसिते शिरीषाभा भागा चेद्दृषदिव कठोरा कुचतटे भृशं मध्ये तन्वी पृथुरुरसि
जारोहविषये जगत्त्रातुं शम्भोर्जयति करुणा काचिदरुणा ९२ समानीतः पद्भ्यां मणि
मुकुटतामम्बरमणिर्भयादन्तस्तब्धस्तिमितकिरणश्रेणिमसृणः दधाति त्वत्पादे प्रति
फलनमश्रान्तविकसन्निरातङ्कं चन्द्रान्निजहृदयपङ्केरुहमिव ९३ पुरारातेरन्तःपु
रमसि ततस्त्वच्चरणयोः सपर्यामर्यादा तरलकरणानामसुलभा तथाह्येते नीताः
शतमखमुखाः सिद्धिमतुलां तव द्वारोपान्तस्थितिभिरणिमाद्याभिरमराः ९४
गतास्ते मंचत्वं द्रुहिणहरिरुद्रेश्वरभृतः शिवः स्वच्छच्छायाघटितकपटप्रच्छदपटः
त्वदीयानां भासां प्रतिफलनलाभारुणतया शरीरी शृंगारो रस इव दृशां दोग्धि कुतुकं ९५
कलंकः कस्तूरी रजनिकरबिम्बं जलमयं कलाभिः कर्पूरैर्मरकतकरण्डं निबि
डितं पुनस्त्वद्भोगेन प्रतिदिनमिदं रिक्तकुहरं विधिर्भूयो भूयो निबिडयति नू
नं तव कृते ९६ स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिरभितो निषेव्ये नित्ये त्वा

महामिति सदा भावयति यः किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतो महासंवर्ताग्निर्विरच
यति नीराजनविधिं ९७ समुद्भूतस्थूलस्तनभरमुरश्चारुहसितं कटाक्षे कंदर्पः कुसु
मितकदंबद्युति वपुः हरस्य त्वद्भ्रांतिं मनसि जनयंतः समतुला भवत्याये भक्ताः प
रिणतिरमीषामियमुमे ९८ कलत्रं वैधात्रं कतिकति भजंते न कवयः श्रियो दे
व्याः को वा न भवति पतिः कैरपि धनैः महादेवं हित्वा तव सति सतीनामचरमे कु
चाभ्यामासंगः कुरवकतरोरप्यसुलभः ९९ गिरामाहुर्देवीं द्रुहिणगृहिणीमा
गमविदो हरेः पत्नीं पद्मां हरसहचरीमद्रितनयां तुरीया कापि त्वं दुरधिगमनिः
सीममहिमा महामाये विश्वं भ्रमयसि परब्रह्ममहिषि १०० सरस्वत्या लक्ष्म्या
विधिहरिसपत्न्यो विहरते रतेः पातिव्रत्यं शिथिलयति रम्येण वपुषा चिरंजीवन्ने
व क्षपितपशुपाशव्यतिकरः परब्रह्माभिख्यं रसयति रसं त्वद्भजनवान् १०१ निधे नि
त्यस्मेरे निरवधिगुणे नीतिनिपुणे निराघातज्ञाने नियमपरचित्तैकनिलये नि
यत्या निर्मुक्ते निखिलनिगमांतस्तुतिपदे निरातंके नित्ये निगमय ममापि स्तुति
मिमां १०२ प्रदीपज्वालाभिर्दिवसकरनीराजनविधिः सुधासूतेश्चंद्रोपलजललवै
रर्घ्यरचना स्वकीयैरंभोभिः सलिलनिधिसौहित्यकरणं त्वदीयाभिर्वाग्भिस्तव जन
नि वाचां स्तुतिरियं १०३ इति श्रीशंकराचार्यविरचितं सौंदर्यलहरीस्तोत्रं संपू ल
र्णं ॥ श्रीः ॥ ॥ राम ॥ ॥ शुभं ॥

ॐ श्रीरामाय नमः ॐ अस्य श्रीरामहृदयस्तोत्रमंत्रस्य श्रीरामचंद्र ऋषिः अनुष्टुप् छंदः श्रीअखंडपुरु
षो देवता सर्वकामनासिद्ध्यर्थे जपे विनियोगः श्रीपार्वत्युवाच यदि स्म जानाति जितो विलापः सीतारा
ते नेन कृतः परेण जानाति नैवं यदि केन सेव्यः समो पि सर्वैरिह जीवजातैः १ नाहं न रात्रिः सवितु
र्यथा भवेत्प्रकाशरूपाव्यभिचारतः क्वचित् ज्ञानं तथा ज्ञानमिदं द्वयं हरे रामे कथं स्यादतिशुद्ध
विग्रहे २ श्रीमहादेव उवाच अत्रैतत्कथयिष्यामि रहस्यमपि दुर्लभं सीतारामम रुत्सूनु संवाद
मोक्षसाधनं ३ पुरा रामायणे रामो रावणं देवकंटकं हत्वा रणे रणश्लाघी सपुत्रबलवाहनं ४
सीतया सह सुग्रीवलक्ष्मणाभ्यां समन्वितः अयोध्यामगमद्रामो हनुमत्प्रमुखैर्वृतः अभिषिक्तः
परिवृतो वसिष्ठाद्यैर्महात्मभिः सिंहासने समासीनः सूर्यकोटिसमप्रभः ६ दृष्ट्वा तदा हनूमंतं
प्रांजलिः पुरतः स्थितं कृतकार्यं निराकांक्षं ज्ञानापेक्षं महामतिं ७ रामः सीतामुवाचेदं ब्रूहि
तत्त्वं हनूमते निष्कल्मषोयं ज्ञानस्य पात्रं नौ नित्यभक्तिमान् ८ तथेति जानकी प्राह तत्त्वं
रामस्य निश्चितं हनुमते प्रपन्नाय सीता लोकविमोहिनी ९ सीता उवाच रामं विद्धि परं ब्रह्म
सच्चिदानंदमद्वयं सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरं १० आनंदं निर्मलं शांतं निर्वि
कारं निरंजनं सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषं ११ मां विद्धि मूलप्रकृतिं सर्गस्थित्यं
तकारिणीं तस्य संनिधिमात्रेण सृजामीदमतंद्रिता १२ तत्सान्निध्यान्मया सृष्टं तस्मिन्नारोप्यते
बुधैः अयोध्यानगरे जन्म रघुवंशेतिनिर्मले १३ विश्वामित्रसहायत्वं मखसंरक्षणं
ततः अहल्याशापशमनं चापभंगो महेशितुः १४ मत्पाणिग्रहणं पश्चाद्भार्गवस्य मद
क्षयः अयोध्यानगरे वासो मया द्वादशवार्षिकं १५ दंडकारण्यगमनं विराधवध एव च

ने

रा॰ म॰ २६ २ पा

मायामारीचमरणं मायासीताहृतिस्तथा १६ जटायुषो मोक्षलाभः कबंधस्य तथैव च शबर्याः पूज
नं पश्चात्सुग्रीवेण समागमः १७ वालिनश्च वधः पश्चात्सीतान्वेषणमेव च सेतुबंधश्च जलधौ
लंकायाश्च निरोधनं १८ रावणस्य वधो युद्धे सपुत्रस्य दुरात्मनः विभीषणे राज्यदानं पुष्पके
ण मया सह १९ अयोध्यागमनं पश्चाद्राज्ये रामाभिषेचनं एवमादीनि कर्माणि मयैवच
रितान्यपि आरोपयंति रामेस्मिन्निर्विकारेखिलात्मनि रामो न गच्छति न तिष्ठति नानुशो
चे न कांक्षति न त्यजति न करोति किंचित् समो राजीवलोचनः आनंदमूर्तिरचलः [illegible]
दविमुक्तः परिणामहीनो मायागुणाननुगतो हि तथा विभाति २१ श्रीमहादेव उवाच ततो रा
मः स्वयं प्राह हनूमंतमुपस्थितं शृणु तत्त्वं प्रवक्ष्यामि ह्यात्मनात्मपरात्मनां २२ आकाश
स्य यथा भेदस्त्रिविधो दृश्यते महान् जलाशये महाकाशस्तदवच्छिन्न एव हि २३ प्रति
बिंबाख्यमपरं दृश्यते त्रिविधं नभः बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णमथापरं २४ आभासस्त्वप
रं बिंबभूतमेवं त्रिधा चितिः साभासबुद्धेः कर्तृत्वमविच्छिन्नेविकारिणि २५ साक्षिण्यारोप्यते
भ्रांत्या जीवत्वं च तथाबुधैः आभासस्तु मृषा बुद्धिरविद्याकार्यमुच्यते २६ अविच्छिन्नं तु तद्ब्रह्म
विच्छेदस्तु विकल्पतः अविच्छिन्नस्य पूर्णेन एकत्वं प्रतिपद्यते २७ तत्त्वमस्यादिवाक्यैश्च साभा
सस्याहमस्तथा ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्मनः २८ तदाविद्या स्वकार्यैश्च
नश्यत्येव न संशयः एतद्विज्ञाय मद्भक्तो मद्भावायोपपद्यते २९ मद्भक्तिविमुखानां
हि शास्त्रगर्तेषु मुह्यतां न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि ३० इदं रहस्यं हृद

यंममात्मनोमयैवसाक्षात्कथितंतवानघ मद्भक्तिहीनायशठाय नत्वयादातव्यमैन्द्रा
दपिराज्यतोधिकं ३१ श्रीमहादेव उवाच एतत्तेकथितंदेवि श्रीरामहृदयंमया अति
गुह्यतमंहृद्यंपवित्रंपापशोधनं ३२ साक्षाद्रामेणकथितं सर्ववेदान्तसंग्रहं यः
पठेत्सततंभक्त्यासमुक्तोनात्रसंशयः ३३ ब्रह्महत्यादिपापानिबहुजन्मा
र्जितान्यपि नश्यन्त्येवनसंदेहोरामस्यवचनंयथा ३४ योतिभ्रष्टोतिपा
पीपरधनपरदारेषुनित्योद्यतोवास्तेयीब्रह्मघ्नोमातापितृवधनिरतोयो
गिवृंदापकारी यःसंपूज्याभिरामंपठतिचहृदयंरामचंद्रस्यभक्त्या योगी
न्द्रैरप्यलभ्यंपदमखिलंलभतेसर्वदेवैःसपूज्यः ३५ इति श्रीअध्यात्मरा
मायणेउमामहेश्वरसंवादेरामहृदयंसमाप्तं॥ रामायनमः ॥
ॐनमोभवान्यैनमः ॐअकुलकुलमनंतीचक्रमध्येस्फुरंती मधुरसमधुपिबंतीकण्ठ
कोभद्रायंती दुरितमपहरंतीसाधकान्तोषयंती जयतिजगदेवीश्रीसुंदरीक्रीडयं
ती चतुर्भुजामेकवक्त्रांपूर्णेन्दुवदनप्रभाम् खड्गशक्तिधरांदेवींवरदाभयपाणिकाम्
प्रेतस्थस्थामहारौद्रींभुजगेन्द्रोपवीतिनीम् भवानीकालसंहारबद्धमुद्राविभू
षिताम् जगत्स्थितिकरींब्रह्मविष्णुरुद्रादिभिःस्तुतैः स्तुतानांपरमेशानींनौम्यहं
विघ्नहारिणीम् ॐनमोभवान्यै कैलासशिखरेरम्येदेवदेवंमहेश्वरं ध्यानोप
रतमासीनंप्रसन्नमुखपंकजम् सितासुरशिरोरत्नरंजितांघ्रियुगंप्रभुम् प्र

णम्य शिरसा नन्दी बद्धाञ्जलिरभाषत श्रीनन्दिकेश्वर उवाच देवदेव जगन्नाथ संशयोऽस्ति महा
भै मम रहस्यमेकमिकामि प्रष्टुं त्वां भक्तवत्सल देवता या त्वया कस्मात् सेव्यते दिवानिशा
२० म् यद्युते विरतं नाथ त्वत्तः किमपरः परः इति पृष्टस्तदा देवो नन्दिकेन जगद्गुरुः प्रोवाच भग
वानेकान्तिकस्तं नृपकजः श्रीभगवानुवाच साधु साधु गणश्रेष्ठ पृष्टवानसि मां च यत्
स्कान्दस्यापि च यद्गोप्यं रहस्यं कथयामि तत् पुरा कल्पक्षये लोकान्सिसृक्षुर्मूढचेतनः
गुणत्रयमयी प्रोक्ता मूलप्रकृतिसंज्ञिता तस्यां महत्समुत्पन्नं तत्वैः सैर्महदादिभिः चेत
नेति ततः शक्तिर्मोक्षाख्या लिंगतस्तु पीठेतुः संकल्पजालस्य मनोधिष्ठात्रिनी प्रभा
रुक्तेति परमा शक्तिरुन्मीलनतः परम् ततो वाणीति विख्याता शक्तिः शब्दमयी पुरा
प्रादुरासीज्जगन्माता वेदमाता सरस्वती ब्राह्मी च वैष्णवी रौद्री कौमारी पार्वती शिवा
सिद्धिदा बुद्धिदा शान्ता सर्वमंगलदायिनी तयैतत्सृज्यते विश्वं मनोधारश्च पाल्यते तयै
तत्पाल्यते सर्वं तस्यामेव प्रलीयते अर्चिता प्रणता ध्याता सर्वभावविनिश्चितैः आ
राधिता स्तुता सैव सर्वसिद्धिप्रदायिनी तस्याश्चानुग्रहादेव तामेव स्तुतवानहम् स
हस्रेण नामभिर्दिव्यैस्त्रैलोक्यप्राणिपूजितैः स्तवेनानेन संतुष्टा मामियं प्रविवेश सा त
दारभ्य मया प्राप्तमैश्वर्यं पदमुत्तमम् तत्प्रभावान्मया सृष्टं जगदेतच्चराचरम् स
सुरासुरगन्धर्वयक्षराक्षसमानवम् सपन्नगं ससमुद्रं सशैलवनकाननम्
सग्रहर्क्षराशिनक्षत्रं पंचभूतगुणान्वितम् नन्दिन्नामसहस्रेण स्तवेनानेन स
र्वदा स्तवे परां पराशक्तिं ममानुग्रहकारिणीम् इत्युक्त्वोपरतं देवं चराचर

गुरुंविभुम् प्रणम्यशिरसानन्दीप्रोवाचपरमेश्वरम् श्रीनन्दिकेश्वरउवाच। भगवन्देवदेवे
श लोकनाथजगत्पते भक्तोस्मितवदासोस्मिप्रसादात्क्रियतांमयि देव्याःस्तवमिमंपु
ण्यंदुर्लभंयत्सुरैरपि श्रोतुमिच्छाम्यहंदेवप्रभावमपिचास्यतु श्रीभगवानुवाच शृ
णुनन्दिन्महाभागस्तवराजमिमंशुभम् सहस्रैर्नामभिर्दिव्यैःसिद्धिदंसुखमोक्षदम्
शुचिभिःप्रातरुत्थायपठितव्यंसमाहितैस्त्रिकालंश्रद्धयायुक्तैर्नातःपरतरःस्तवः
अस्यश्रीभवानीनामसहस्रस्तवराजस्य श्रीमहादेवऋषिः अनुष्टुप्छंदः श्रीदे
वीप्रीत्यर्थेजपेपाठेविनियोगः अथध्यानम् ओंअर्धेन्दुमौलिममलाममराभिवन्द्या
मंभोजपाशसृणिरक्तकपालहस्ताम् रक्तांगरागरसनाभरणांत्रिनेत्रांध्याये
च्छिवस्यवनितांमदविह्वलांगीम् श्रीईश्वरउवाच ओंमहाविद्याजगन्मातामहाल
क्ष्मीःशिवप्रिया विष्णुमायाशुभाशान्तासिद्धासिद्धसरस्वती क्षमाकान्तिःप्रभाज्यो
त्स्नापार्वतीसर्वमंगला हिंगुलाचंडिकादान्तापद्मालक्ष्मीर्हरिप्रिया त्रिपुरानन्दिनी
नन्दासुनन्दासुरवन्दिता यज्ञविद्यामहामायावेदमातासुधाधृतिः प्रीतिःप्र
थाप्रसिद्धाचमृडानीविन्ध्यवासिनी सिद्धविद्यामहाशक्तिःपृथ्वीनारदसेविता पुरुहू
तप्रियाकान्ताकामिनीपद्मलोचना प्रह्लादिनीमहामातादुर्गादुर्गतिनाशिनी
ज्वालामुखीसुगोत्राचज्योतिःकुमुदवासिनी दुर्गमादुर्लभाविद्यास्वर्गतिः
पुरवासिनी अपर्णाशाम्बरीमायामदिरामृडहासिनी कुलवागीश्वरी

भ·
२८

नित्यानित्यक्लिन्नाकृशोदरी कामीश्वरीचनीलाचभेरुंडावह्निवासिनी लंबोदरीमहाकाली
विद्याविद्येश्वरीतथा नरेश्वरीचसत्याचसर्वसौभाग्यवर्धिनी संकर्षिणीनारसिंहीवैष्ण
वीचमहोदरी कात्यायिनीचचंपाचसर्वसंपत्तिकारिणी नारायणीमहानिद्रायोगनि
द्राप्रभावती प्रज्ञापारमिताप्रज्ञातारामधुमतीमधु क्षीराणिवसुधाचुद्राकालिकासिंह
वाहना ॐकाराचस्वधाकाराचेतनाकोपनाकृतिः अर्धबिंदुधराधीरा विश्वमाताक ६
लावती पद्मावतीसुवस्त्राचप्रबुद्धाचसरस्वती कुंडासीनाजगद्धात्रीबुद्धमाताजिनेश्व
री जिनमाताजिनेन्द्राचशारदाहंसवाहना राज्यलक्ष्मीवषट्कारास्वधाकारासुधात्मि
का राजनीतिस्त्रयीवार्तादंडनीतिःक्रियावती सद्भूतिस्तारिणीश्रद्धासद्गतिःसत्यपरा
यणा सिन्धुर्मन्दाकिनीगंगायमुनाचसरस्वती गोदावरीविपाशाचकावेरीचश
तद्रुका सरयूश्चन्द्रभागाचकौशिकीगंडकीशुचिः नर्मदाकर्मनाशाचचर्मण्वतीच
देविका वेत्रवतीवितस्ताचवरदानरवाहना सतीपतिव्रतासाध्वीसचक्षुःकुंडवासि
नी एकचक्षुःसहस्राक्षीसुश्रोणिर्भगमालिनी सेनाश्रेणिपताकाचसुव्यूहायु
द्धकांक्षिणी पताकिनीदयारंभाविपंचीपंचमप्रिया परापरकलाकांतात्रिशक्ति
र्मोक्षदायिनी ऐन्द्रीमाहेश्वरीब्राह्मीकौमारीकुलवासिनी इच्छाभगवतीशक्तिः
कामधेनुःकृपावती वज्रायुधावज्रहस्ताचंडीचंडपराक्रमा गौरीसुवर्णावर्णा
चस्थितिसंहारकारिणी एकानेकामहेज्याचशतबाहुर्महाभुजा भुजंगभूष

णाभूषा षट्चक्रक्रमवासिनी षट्चक्रभेदिनी श्यामा कायस्था कायवर्जिता सुस्मिता सु-
मुखी क्षामा मूलप्रकृतिरीश्वरी अजा च बहुवर्णा च पुरुषार्थप्रवर्तिनी रक्ता नीला सिता श्या-
मा कृष्णा पीता च कर्बुरा क्षुधा तृष्णा जरा वृद्धा तरुणी करुणालया कला काष्ठा मुहूर्ता च नि-
मेषा कालरूपिणी सुवर्णरसना नासा चक्षुः स्पर्शवती रसा गन्धप्रिया सुगन्धा च सुस्पर्शा
च मनोगतिः मृगनाभिर्मृगाक्षी च कर्पूरामोदधारिणी पद्मयोनिः सुकेशी च सुलिंगा भगरूपि-
णी योनिमुद्रा महामुद्रा खेचरी खगगामिनी मधुश्रीर्माधवी वल्ली मधुमत्ता मदोद्धता मा-
तंगी शुकहस्ता च पुष्पबाणेक्षुचापिणी रक्ताम्बरधरा क्षीवा रक्तपुष्पवतंसिनी शुभ्राम्बरधा-
री महाश्वेता वसुप्रिया सुवेणी पद्महस्ता च मुक्ताहारविभूषणा कर्पूरामोदनिश्वासा
पद्मिनी पद्ममन्दिरा खड्गिनी चक्रहस्ता च त्रिशूलवरधारिणी चापिनी पाशहस्ता च भु-
शुण्डी परिघा कथा (?) सबाणशक्तिहस्ता च मयूरवरवाहना वराभयधरा वीरा वीरपानमदो-
त्कटा वसुधा वसुधारा च जया शाकंभरी शिवा विजया च जयन्ती च सुस्तनी शत्रुनाशिनी अं-
तर्वत्नी वेदशक्तिर्वरदा वरदायिनी शीतला च सुशीला च बालग्रहविनाशिनी कुमारी
च सुपर्वा च कामाख्या कामवन्दिता ज्वालन्धरपठनेता (?) कामरूपनिवासिनी कामबी-
जवती सत्या सत्यधर्मपरायणा स्थूलमार्गस्थिता सूक्ष्मा सूक्ष्मबुद्धिः प्रबोधिनी ष-
ट्कोणा च त्रिकोणा त्रिनेत्रा त्रिपुरसुन्दरी वृषप्रिया वृषारूढा महिषासुरघातिनी
शुम्भदर्पहरा दीप्ता दीप्तपावकसन्निभा कपालभूषणा काली कपालमालाधारिणी कपा-
लकुण्डला दीर्घा शिवदूती च घनध्वनिः सिद्धिदा बुद्धिदा नित्या सत्यमार्गप्रबोधिनी कंबु-

प॰ २५ 29

ग्रीवा वसुमती छत्रच्छाया छत्रालया जगद्गर्भा कुण्डलिनी भुजगाकारशालिनी प्रोल्लसत्सप्तपद्मा
चनाभिनालमृणालिनी मूलाधारा निराकारा वह्निकुण्डकृतालया वायुकुण्डसुखासीना निरा
धारा निराश्रया श्वासोच्छ्वासगतिर्जीवा ग्राहिणी वह्निसंश्रया वल्लीतन्तुसमुत्थाना षड्रसास्वा
दुलोलुपा तपस्विनी तपःसिद्धिस्तपसः सिद्धिदायिनी तपोनिष्ठा तपोयुक्ता तापसी च तपः
प्रिया सप्तधातुमयीमूर्तिः सप्तधात्वन्तराश्रया देहपुष्टिर्मनःपुष्टिरन्नपुष्टिर्बलोद्धता ओष
धि वैद्यमाता च द्रव्यशक्तिः प्रभावती वैद्या वैद्यचिकित्सा च सुपथ्या रोगनाशिनी मृ
गया मृगमांसादा मृगत्वङ् मृगलोचना वागुरा बन्धरूपा च वधरूपा वधोद्धता वन्दी व
न्दिस्तुता कारा कारावन्धविमोचिनी शृंखला खलहा विद्युद्दृढबन्धविमोचिनी अवि
का कालिका चाम्बा सुद्धा सा पञ्जनार्चिता कौलिकी कुलविद्या च सुकुला कुलपूजिता
कालचक्रभ्रमा भ्रान्ता विभ्रमा भ्रमनाशिनी वात्याली मेघमाला च सुवृष्टिः सस्यवर्धिनी
अकारा च इकारा च उकारैकाररूपिणी ह्रींकारबीजरूपा च क्लींकाराम्बरवासिनी
सर्वाक्षरमयी शक्तिरक्षरा वर्णमालिनी सिन्दूरारुणवर्णा च सिन्दूरतिलकप्रिया वश्या च व
श्यबीजा च लोकवश्यविभाविनी नृपवश्या नृपैः सेव्या नृपवश्यकरी प्रिया महिषी नृ
पमान्या च नृमान्या नृपनन्दिनी नृपधर्ममयी धन्या धनधान्यविवर्धिनी चतुर्वर्णमयी
मूर्तिः चतुर्वर्णैः प्रपूजिता सर्वधर्ममयी सिद्धिः चतुराश्रमवासिनी ब्राह्मणी क्षत्रि
यी वैश्या शूद्रा चवरवर्णजा वेदमार्गरता यज्ञा वेदविश्वविभाविनी अस्त्रशस्त्र
मयी विद्या वरशस्त्रास्त्रधारिणी सुमेधा सत्यमेधा च भद्रकाल्यपराजिता गाय

ह्रीसत्कृतिः संध्या सावित्री त्रिपदाश्रया त्रिसंध्या त्रिपदी धात्री सुपर्वा सामगायिनी पांचा
ली बालिका बाला बालक्रीडा सनातनी गर्भाधारधरा शून्या गर्भाशयनिवासिनी सुरारि
घातिनी कृत्या पूतना च तिलोत्तमा लज्जा रसवती नन्दा भवानी पापनाशिनी पट्टांबर
धरा गीतिः सुगीतिर्ज्ञानलोचना सप्तस्वरमयी तंत्री षड्जमध्यमदैवता मूर्छनाग्रामसं
स्था च स्वस्था स्वस्थानवासिनी अट्टाट्टहासिनी प्रेता प्रेतासननिवासिनी गीतनृत्यप्रिया
कामा तुष्टिदा पुष्टिदा क्षया निष्ठा सत्यप्रिया प्रज्ञा लोकेशी च सुरोत्तमा सविषाज्वालिनी
ज्वाला विषमोहार्त्तिनाशिनी विषारिर्नागदमनी कुरुकुल्लामृतोद्भवा भूतभीतिहरार
क्षा भूतावेशविनाशिनी रक्षोघ्नी राक्षसी रात्री दीर्घनिद्रा दिवागतिः चंद्रिका चंद्रकां
तिश्च सूर्यकान्तिर्निशाचरी डाकिनी शाकिनी शिष्या हाकिनी चक्रवाकिनी सितासित
प्रिया स्वंगा सकला वनदेवता गुरुरूपधरा गुर्वी मृत्युर्मारी विशारदा महामारीविनि
द्रा च तंद्रा मृत्युविनाशिनी चंद्रमंडलसंकाशा चंद्रमंडलवासिनी अणिमादिगुणो
पेता सुस्पृहा कामरूपिणी अष्टसिद्धिप्रदा प्रौढा दुष्टदानवघातिनी अनादिनिध
ना पुष्टिः चतुर्बाहुश्चतुर्मुखी चतुःसमुद्रशयना चतुर्वर्गफलप्रदा काशपुष्पवती
काशा शरत्कुमुदलोचना भूता भव्या भविष्या च शैलजा शैलवासिनी वाममार्गर
ता वामशिववामांगवासिनी वामाचारप्रिया तुष्टिर्लोपामुद्राप्रबोधिनी भूतात्मा प
रमात्मा च भूतभावविभाविनी मंगला च सुशीला च परमार्थप्रबोधिका दक्षि
णा दक्षिणामूर्त्तिः सुदक्षिणा हरिप्रिया योगिनी योगयुक्ता च योगांगा ध्यान

शालिनी योगपट्टधरा मुक्तिर्मुक्तानां परमा गतिः नारसिंही सुजन्मा च त्रिवर्गफलदायिनी धर्मदा ध
५· नदा चैका कामदा मोक्षदा द्युतिः साक्षिणी क्षणदा दक्षा दक्षजा कोटिरूपिणी क्रतुः कात्यायनी
३० स्वच्छा स्वच्छन्दा च कविप्रिया सत्यागमा बहिःस्था च काव्यशक्तिः कवित्वदा मेनापुत्री सती मा
ता मैनाकभगिनी तडित् सौदामिनी सुधामा च सुधामा धामशालिनी सौभाग्यदायिनी द्यौश्च सु
भगा द्युतिवर्धिनी श्रीः कृत्तिवसना चैव कंकाली कलिनाशिनी रक्तबीजवधोद्रिक्ता सुत
न्तुः बीजसन्ततिः जगज्जीवा जगद्बीजा जगत्त्रयहितैषिणी चामीकररुचिश्चान्द्री साक्षाद्याषो
डशी कला यत्तत्पदानुबन्धा च यक्षिणी धनदार्चिता चित्रिणी चित्रमाया च विचित्रा भुवने
श्वरी चामुण्डा मुण्डहस्ता च चण्डमुण्डवधोद्धुरा अष्टमी एकादशी पूर्णा नवमी च चतुर्दशी अमा
कलशहस्ता च पूर्णकुम्भधराधरा अभीरुर्भैरवी भीरा भीमा त्रिपुरसुन्दरी महाचण्डा
च रौद्री च महाभैरवपूजिता निर्मुण्डहस्तिनी चण्डा करालदशनानना कराला विकरा
ला च घोरघर्घरनादिनी रक्तदन्तोर्ध्वकेशी च बन्धूककुसुमारुणा कादम्बरी पटासा च
काश्मीरी कुङ्कुमप्रिया क्षान्तिर्बहुसुवर्णा च रतिर्बहुसुवर्णदा मातङ्गिनी वरारोहा मत्त
मातङ्गगामिनी हंसा हंसगतिर्हंसी हंसोज्ज्वलशिरोरुहा पूर्णचन्द्रमुखी श्यामा स्मि
तास्या श्यामकुण्डला मषी च लेखनी लेख्या सुलेखा लेखकप्रिया शङ्खिनी शङ्खहस्ता च श्री
जलस्था जलदेवता कुरुक्षेत्रावनिः काशी मथुरा काञ्च्यवन्तिका अयोध्या द्वारिका मा
या तीर्था तीर्थकरप्रिया त्रिपुष्करा प्रमेया च कोशस्था कोशवासिनी कौशिकी च कुशा
वती कौशाम्भी कोशवर्धिनी कोशदा पद्मकोशाक्षी कुसुमा कुसुमप्रिया तोतला
च तुला कोटिः कोटिस्था कोटराश्रया स्वयम्भूश्च सुरूपा च स्वरूपा रूपवर्धिनी ते

जस्विनी स्तुभिक्षा च वलस्वलदायिनी महाकोशी महावार्ता बुद्धिः सदसदात्मिका
महाग्रहहरा सौम्या विशोका शोकनाशिनी सात्विकी सत्वसंस्था च राजसी च रजो
वृता तामसी च तमोयुक्ता गुणत्रयविभाविनी अव्यक्ता व्यक्तरूपा च वेद
विद्या च शांभवी शंकराकल्पिनी कल्पा मनःसंकल्पसंततिः सर्वलोकमयी
शक्तिः सर्वश्रवणगोचरा सर्वज्ञानवती वांछा सर्वतत्वावबोधिनी जाग्रती
च सुषुप्तिश्च स्वप्नावस्था तुरीयका त्वरा मन्दगतिर्मंदा मदिरामोदधारिणी
पानभूमिः पानपात्रा पानदानकरोद्यता आघूर्णारुणनेत्रा च किंचिदव्यक्त
भाषिणी आशापूरा च दीक्षा च दक्षा दीक्षितपूजिता नागवल्ली नागकन्या
भोगिनी भोगवल्लभा सर्वशास्त्रवती विद्या सुस्मृतिर्धर्मवादिनी श्रुतिः श्रु
तिधरा ज्येष्ठा श्रेष्ठा पातालवासिनी मीमांसा तर्कविद्या च सुभक्तिर्भ
क्तवत्सला सुनाभिर्यातना जातिर्गंभीरा भाववर्जिता नागपाशधरा मूर्ति
रगाधा नागकुंडला सुचक्रा चक्रमध्यस्था चक्रकोणनिवासिनी सर्वमं
त्रमयी विद्या सर्वमंत्राक्षरावलिः मधुस्रवा स्रवंती च भ्रामरी भ्रमरालकाः
मातृमंडलमध्यस्था मातृमंडलवासिनी कुमारजननी क्रूरा सुमुखी
ज्वरनाशिनी अतीता विद्यमाना च भाविनी प्रीतमंजरी सर्वसौख्यवती
भुक्तिराहारपरिणामिनी निदानं पंचभूतानां भवसागरतारिणी
अक्रूरा च ग्रहवती विग्रहा ग्रहवर्जिता रोहिणी भूमिगर्भा च काल
भूः कालवर्तिनी कलंकरहिता नारी चतुष्षष्ट्यभिधावती जीर्णा

भं. चजीर्णवस्त्राच नूतनानववल्लभा अराजाश्चरतिः प्रीतिरतिरागविवर्धिनी पंच
भं. ३१ वात्मगतिर्भिन्ना पंचक्लेशमाशयाधरा पंचपितृवती मुक्तिः पंचस्थानविभोधिनी
३० उदक्याचवृषस्यन्ती वह्निः प्रस्रविनीत्वरम् रजः शुक्रधराशक्तिजरायुगर्भ
धारिणी त्रिकालज्ञा त्रिलिंगा त्रिमूर्तिस्त्रिपुरवासिनी अरागाशिवतत्वाचका
मतत्वानुरागिणी प्राच्यवाचीप्रतीचीदिगुदीचीदिग्विदिग्दिशः अहंकृतिर
हंकाराबलमायाबलिप्रिया स्रुक्स्रुवासामिधेनीचसुश्रद्धाश्राद्धदेवता
मातामातामहीतृप्तिः पितृमातापितामही स्नुषादौहित्रिणेपुत्रीपौत्री
नप्त्रीशिशुप्रिया स्तनदास्तनधाराचविश्वयोनिःस्तनन्धयी शिशूत्संग
धरादोलादोलाक्रीडाभिनंदिनी उर्वशीकदलीकेकाविशिखाशिखिवर
र्तिनी रविबिंबधारिणीखड्गबाणधनुर्वरानुवर्तिनी लक्ष्यप्राप्तिःकरा
लक्ष्याध्यक्षाचशुभलक्षणा वर्तिनीसुपथाचारापरिखाचखनिर्वृतिः
प्राकारवलयावीलामर्यादाचमहोदधेः पोषणीशोषणीशक्तिर्दीर्घके
शीसुलोमशा ललितामांसलातन्वीवेदवेदांगधारिणी नरास्रक्यानम
त्ताचनरमुंडास्थिभूषणा अक्षक्रीडारतिःशारीशारिकाशुकभाषि
णी शंभरीगारुडीविद्यावारुणीवरुणार्चिता वाराहीमुण्डहस्ताचदं
ष्ट्रोद्धृतवसुन्धरा मीनमूर्तिधरामूर्तावदन्याप्रतिमाश्रया अमूर्तानि
धिरूपाचशालिग्रामशिलाशुचिः स्मृतिसंस्काररूपाचसुसंस्कारा
प्रसंस्कृतिः प्राकृतादेशभाषाचगाथागीतिः प्रहेलिका इडाचपिंग

लापिंगा सुषुम्णा सूर्यवाहिनी शशिहृत्वा च तालुस्था काकिनी मृतजी
विनी अनुरूपा वृहद्रूपा लघुरूपा गुरुस्थिरा स्थावरा जंगमा देवी कृत
कर्मफलप्रदा विषयाक्रांतदेहा च निर्विशेषा जितेंद्रिया विश्वरूपा।
चिदानन्दा परंब्रह्मप्रबोधिनी निर्विकारा च निर्वैरा विरतिः सत्यवर्धिनी
पुरुषाज्ञा च भिन्ना च शांतिः कैवल्यदायिनी विविक्तसेविनी प्रज्ञाजन
यित्री बहुश्रुतिः निरीहा च समस्तैका सर्वलोकैकसेविता सेवा सेव्या प्रिया
सेव्या सेव्याफलविवर्धिनी कलौ कल्किप्रिया काली दुष्टम्लेच्छविनाशिनी
प्रत्यंचा च धनुर्यष्टिः खड्गधारा दुरागतिः अश्वप्लुतिश्च वल्गा च सृणिः
सन्मत्तवारणा वीरभूर्वीरमाता च वीरसूर्वीरनन्दिनी जयश्रीर्जयदीक्षा
च जयदा जयवर्धिनी सौभाग्यसुभगाकारा सर्वसौभाग्यवर्धिनी क्षे
मंकरी सिद्धिरूपा सत्कीर्तिः पथिदेवता सर्वतीर्थमयी मूर्तिः सर्वदेव
मयी प्रभा सर्वसिद्धिप्रदा शक्तिः सर्वमंगलमंगला पुण्यसहस्रना
मेदं मया यां कृष्णभाषितम् चतुर्वर्गप्रदं सत्यं नन्दिकेन प्रकाशितं
नातः परतरं विद्या नातः परतरा स्तुतिः नातः परतरो मंत्रस्तीर्थं नातः परं
परं नैधन्यः कृतपुण्यास्ते त एव भुवि पूजिताः एकभावमुदा नित्यं ये
चैयंती महेश्वरीम् देवतानां देवताया नला धैर्याच पूजिता भूयात्साव
रदा लोके साधूनां विश्वमंगला पृता मे तव यस्मात्प्रविश्वा त्रिपुरसुन्दरीम्
त्रैलोक्यमोहनं रूपमकार्षीद्भगवान्हरिः इति श्री रुद्रयामले तंत्रे नन्दिकेश्वरसं

वादे महाप्रभावो भवानीनामसहस्रस्तवराजः संपूर्णस्समाप्तः ॥ ४५